तयानुमितिरूपमित्यनुमानेंतर्भावः तथा वटे यक्ष इत्यादिरूपैतिह्यस्यानिर्दिष्टवक्तृकप्रवादपरंप
रारूपस्य यथार्थत्वेन शब्दप्रमाणमध्येंतर्भावः अन्यथात्वप्रमाणमेवेति बोध्यं प्रमाणप्रसंगात्प्रामाण्य
स्य परतोग्राह्यत्वव्यवस्थापयिष्यन् दुरूहतया शिष्यावधानाय तन्निरूपणं प्रतिजानीते इदमिति
वेदप्रमाणं प्रामाण्यस्य परतोग्राह्यत्वमित्यर्थः निरूप्यते परपक्षनिराकरणपूर्वकं प्रतिपाद्यते नैयायिकम
तमवलंब्य विचारांगभूतविषये दर्शनं करोति जलादीति तस्येति जलादिज्ञानस्य प्रामाण्यं जलत्ववद्विशे

गो. श्री. माण्यज्ञानमात्रमुक्तेजनकम् अप्रामाण्यनिश्चयसत्त्वे इदं ज्ञानं प्रमाणं नवेति तत्राप्रामाण्यसंदेहेपि प्रवृत्तिद
७३ र्शनात् तथा चाप्रामाण्यनिश्चयस्याप्रामाण्यज्ञानमिदं ज्ञानं अप्रामाण्यवत् अप्रामाण्यप्रकारकमित्या
144 कारकम् नच पूर्वोपदर्शितप्रामाण्यज्ञाना प्रामाण्यनिश्चयापेक्षया अल्पत्वेति नैयायिकानामाशयः
अत्र प्रामाण्यनिश्चयस्यैव प्रवृत्तिमात्रं प्रति हेतुतानं ज्ञाननिश्चयस्यैव तज्ज्ञाने प्रामाण्यनिश्च
यरूपत्वात् अवदुक्तसंशयस्थलेपि अवश्यं प्रामाण्यनिश्चयसत्त्वे अन्यथा ज्ञानस्याज्ञाने ज्ञानधर्मि
कसंशयानुपपत्तेरिति वादिनां मीमांसकानां मतमुत्थापयति अत्र कश्चिदिति कश्चिदित्येकवच
नं तु प्रामाण्यनिश्चयस्य प्रवृत्तिहेतुतावादित्वेन अन्येषामपि मीमांसकानामेकाभिप्रायकं अनुपा
देयमेव वचनतया अनादरसूचनार्थं वा बोध्यं अत्र च जलादिविषयकज्ञानप्रामाण्यस्याश्रयविष
यकप्रथमज्ञाना विषयो न वेति संदेहे परतो विप्रतिपत्तिर्बोध्या ज्ञानत्वादौ भावकोटिप्रसिद्धिः प्रथमत्वं
च स्वाश्रयविषयज्ञानध्वंसासमानकालोत्पत्तिकत्वम् प्रागेवेत्येवकारो भिन्नक्रमः प्राक् प्रामाण्य
मवधार्यैवेत्यर्थः ननूक्त एव प्रामाण्यसंदेहोत्तरकालीनप्रवृत्तिस्थले तन्निश्चयस्य व्यभिचार इ ७

सफल ५

145 भिचार इति वाच्यम् यत्राप्रामाण्यस्य प्रामाण्यस्य वाज्ञानं नास्ति केवलं जलादिविषयकं ज्ञानं तत्रापि प्र
वृत्तिदर्शनात् तथा च जलादिज्ञाने सलिलं इदं ज्ञानमप्रमेत्यप्रामाण्यज्ञाने सत्वे प्रवृत्त्यदर्शनात्तत्संश
ये सत्यपि प्रवृत्तिदर्शनात्प्रवृत्तित्वस्य प्रामाण्यनिश्चयस्यैव प्रतिबंधकत्वं कल्प्यते तदभावस्याप्रामा
ण्यसंदेहकाले प्रामाण्यनिश्चयकाले प्रामाण्याप्रामाण्यज्ञानाभावकाले प्रवृत्तिहेतुः प्रामाण्यनिश्च
यकाले अप्रामाण्यज्ञानाभावान्निष्कंपप्रवृत्तिः संशयकाले प्रामाण्यनिश्चयाभावात्सकं
पप्रवृत्तिः वस्तुतस्तु सकंपत्वनिष्कंपत्वे फलसंदेहकालीनप्रवृत्तित्वावृत्तित्वरूपे फलसंदेहसामग्री
तदभावाधीनत्वादर्थसमाजग्रस्ते अपि च प्रामाण्यज्ञानस्य हेतुत्वे तत्रापि प्रामाण्यज्ञानस्य हेतुत्वे
अनवस्थापत्त्या अप्रामाण्यनिश्चयस्यैव प्रतिबंधकता वाच्या प्रामाण्यं च तद्वति तत्प्रकारकत्वं
प्रामाण्यज्ञानस्याप्रामाण्यं प्रामाण्याभाववति प्रामाण्यप्रकारकत्वं तस्य निश्चयः प्रामाण्याभाव
वति प्रामाण्यप्रकारकत्वाभावाप्रकारकत्वे सति प्रामाण्याभाववति प्रामाण्यप्रकारकत्वेप्र
कारकतानरूपः प्रतिबंधकस्तदभावः कारणमिति गौरवम् अस्मन्मते त्वप्रामाण्यनिश्चये प्रा

गौ.श. चैर्नोर्घोपस्थापितेनाग्रहणात्तु प्रामाण्यस्य स्वतस्त्वमिति संक्षेपः ननु यदि स्वज्ञानविषयकानुमित्यादितः प्रामाण्यग्रहे
२४ पि स्वतस्त्वं तदा नैयायिकमतेप्येतदविरुद्धं इदं ज्ञानं प्रमेत्यादि ज्ञानमतसिद्धप्रामाण्यग्राहकानुमित्यादेरपि तद्
146 ज्ञानविषयकत्वादित्यत आह अस्यार्थ इति अत्र येन सम्बन्धेन तज्ज्ञानाप्रामाण्यग्राहकभिन्नेनेति विशेषणं दे
यं तेनेदं ज्ञानमप्रमेति तु ज्ञानाप्रामाण्यग्राहकस्य तज्ज्ञानग्राहकस्य तज्ज्ञानप्रामाण्यग्राहकत्वेपि न क्षतिः
एवं ज्ञानभिन्नस्य विषयविशिष्टमिति विशेषणं देयं तेन ज्ञानं प्रमेयमिति शाब्दबोधस्य ज्ञानत्वेन रूपे
ण तज्ज्ञानग्राहकस्य तज्ज्ञानप्रामाण्यग्राहकत्वेपि न क्षतिः अत्रैव कारणं येन व्याप्यव्यापकभावो वगम्य
ते तथा च तज्ज्ञानाप्रामाण्यग्राहकभिन्नत्वे सति विषयविशिष्टतज्ज्ञानग्राहकत्वं व्याप्यं तज्ज्ञानप्रामा
ण्यग्राहकत्वं व्यापकमित्यर्थः ईदृशं च स्वतस्त्वं मीमांसकमत एव तादृशज्ञानविषयकज्ञानमात्रस्य
प्रामाण्यग्राहकत्वात् नैयायिकमते तु नास्ति तादृशस्याप्यनुव्यवसायरूपस्य परामर्शाद्यभावेन प्रा
माण्यग्राहकत्वात् तदेव दर्शयति नास्त्विति नन्विदमसंगतं ज्ञानग्राहकान्यस्य प्रामाण्यग्राहकत्वं
केनाप्युपगम्यते येन प्रतिषेधोऽर्थवान् स्यात् नैयायिकमतेपि प्रामाण्यग्राहकानुमित्यापन्नतया १८

वघटत्वेन घटमहं जानामीत्याकारकमेव ज्ञानं ३

147 त्पत्तप्त्याह स्वत एवेति अत्र स्व ज्ञाप्यस्वस्वकीयोभयपरत्वं तेन स्वस्मात् स्वकीयाच्च ज्ञानप्रामाण्यनिश्चया
दित्यर्थः अत्र स्वस्मादिति प्रामाण्याश्रयीभूतज्ञानेनैव स्वनिष्ठं प्रामाण्यं गृह्यत इति गुरुमतं तथा हि तन्मते स
ज्ञान र्वस्मिन्नेव ज्ञाने मितिर्मातामेयश्चेति त्रितयं विषयी भवति घटत्वेन घटमहं जानामीत्याकारकं ज्ञानं हि उत्पद्यते
अत्र प्रामाण्यघटकीभूतघटत्वप्रकारकत्वघटविशेष्यकत्वयोः स्वानिष्ठयोः स्वप्रकाशात्मकेन स्वेनैव प्रामाण्यं नैव
गृहणान्न भवति प्रामाण्यस्य स्वतो ग्रहणं अत्र च तद्विशेष्यकत्वे तत्प्रकारकत्वादिकं पूर्वमनुपस्थितमेव भा
सते विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुताया स्वीकारात् इति त्रिपुटीप्रत्यक्षवादिनां प्रामाण्यग्र
हणस्य स्वतस्त्वं स्वकीयादित्यस्य स्वाश्रयविषयकज्ञानादित्यर्थः तच्च ज्ञानं मुरारिमिश्रमते अनुव्यव
सायरूपं यथायं घट इति ज्ञाने जाते मनसा घटत्वेन घटमहं जानामीति ज्ञानविषयकं ज्ञानं जन्यते तत्रश्चे
करीत्या प्रामाण्यघटकीभूतपदार्थोपस्थितेः स्वकीयेनानुव्यवसायेन ग्रहणात् प्रामाण्यस्य स्वतस्त्वं
भट्टानां मते स्वकीयार्थापत्तिरूपाद् अनुमितिरूपाद्वेत्यर्थः तथा हि तेषां मते ज्ञानस्यातीन्द्रियत्वज्ञाततो
त्पत्त्यन्यथानुपपत्त्या कल्पनं तत्र ज्ञाने भासमानेनैव वस्तुमात्ररीत्या प्रामाण्यमपि भासत इति स्वकी

तो॰ ७५ द्ज्ञानाभावादित्यपि वेध्यम् यत्तु प्रामाण्याप्रामाण्ययोर्ज्ञानाभावेपि कंपित्प्रवृत्तिरिति तदसिद्धम् तथाहि
प्र॰ प्रामाण्यनिश्चयस्य प्रवृत्तिहेतुतया प्रवृत्तिपूर्वं प्रामाण्यज्ञानावश्यकत्वम् तच्च नैयायिकोक्तरीत्या न संभ
148 वति अभ्यासदशायां संभवेपि प्रथमम् अनभ्यासदशापन्नस्थले ऽसंभवात् तज्ज्ञानीयतामांतरे प्रामाण्य
ग्रहेण व्याप्तेरग्रहात् समर्थप्रवृत्तिजनकत्वलिंगिकानुमितेः प्रवृत्त्युत्तरकालत्वादिति प्रवृत्तिपूर्वं नि
यमतः प्रामाण्यज्ञानसिद्धये प्रामाण्यग्रहस्य स्वतस्त्वमभ्युपगमः तत्र गुरुमते ज्ञानस्य स्वप्रकाशतया ऽद
दतत्प्रामाण्यज्ञानमसिद्धम् इतरमतद्वये तु ज्ञानग्राहकमेव प्रवृत्तिस्वीकारात् ज्ञानग्राहके च प्रामाण्यग्राह
स्यावश्यकत्वात्प्रामाण्यग्रहं विनापि प्रवृत्त्यसिद्धेः एतावता सामान्यतो मीमांसकमतत्रयसिद्धं प्रामा
ण्यग्रहस्य स्वतस्त्वं प्रदर्श्य परोक्षेपि सामान्यतो दूषयितुं प्रथमं भट्टमताभ्युपगतां ज्ञाततां दूषयितुं तन्मत
मुपन्यस्यति तस्मादिति यस्मात्प्रामाण्यनिश्चयं विना न प्रवृत्तिस्तस्मादित्यर्थः प्रवृत्तेः पूर्वमेव प्रा
माण्यमर्थापत्त्या गृह्यत एवेत्यन्वयः तन्मते ज्ञानस्यातींद्रियत्वात् ज्ञानजन्यज्ञातताऽन्यथानुपपत्त्या
ज्ञानविषयेणार्थापत्तिः प्रमाजन्यते साच प्रमाज्ञानं विषयीकुर्वती तद्गतं प्रामाण्यमपि विषयीकरो १८

149 तज्ज्ञानग्राहकत्वादिति चेन्नैवं ज्ञानग्राहकादित्यस्य प्राथमिकादिति विशेषणेन । न च तथाप्यसंगतिः
प्राथमिकभिन्नस्य नैयायिकाभ्युपगतस्यापि प्रामाण्यग्राहकस्य मीमांसकस्य मते तथात्वाभ्युप
गमात् अन्यथा व्याप्तिभंगापत्तेः तथा च तन्निषेधानौचित्यादिति वाच्यम् अन्यादित्यस्य अन्यदेवे
त्यर्थात् तथा च प्राथमिकज्ञानग्राहकान्यमात्रेण प्रामाण्याग्राहकमित्यर्थः प्राथमिकत्वं च स्वो
त्तौ नैयायिकमते तथात्वमिष्टं प्राथमिकेन ज्ञानेन कदापि प्रामाण्याग्रहादिति न कोप्यनुपपत्तिः
यथा ज्ञानधर्मस्य ज्ञानत्वस्य ज्ञानग्राहकज्ञानमात्रग्राह्यत्वं तथा प्रामाण्यस्येति दर्शयितुं ज्ञानधर्मस्येति विशेष
णं पर्यवसन्नम् स्वतस्त्वमुपसंहरति तेनेति प्राथमिकज्ञानग्राहकातिरिक्तमात्रानपेक्षत्वमित्यर्थः प्रा
थमिकज्ञानग्राह्यत्वमिति तु निष्कर्षः प्रामाण्यस्येत्यस्य यथाश्रुते प्रामाण्यग्रहस्येत्यर्थः ननु प्रवृत्तिहेतु
ज्ञानग्रहे सति तेन प्रामाण्यग्रहः न च सर्वत्र ज्ञानग्रहे प्रामाण्यमस्तीत्यत आह ज्ञानं चेति विपक्षे बाधक
तर्कमाह कथमिति ज्ञानग्रहाभावे ज्ञाने प्रामाण्यसंशयाभावमुपपादयति अनधिगतेति धर्मिज्ञा
नस्य संशयहेतुत्वादिति भावः इदमुपलक्षणं अभ्यासदशापन्नस्थलेपि प्रामाण्यानुमितिरपि न स्यात्

दी० २६
श्रा

पेऽनुपमानत्वे सति तत्कालोपलम्भमानत्वात् तत्कालोत्पत्तिकसंयोगादिवद्वितिलात्यर्थम् घटादे
व्यभिचारवारणाय विशेषणदलम् गगनाकाशादेर्व्यभिचारवारणाय विशेष्यदलम् एवं जन्यता
सिद्धौ ज्ञानके कल्पनीयेऽन्वयव्यतिरेकाभ्यां मनसः ज्ञानजन्यत्वं निश्चीयतेऽनिदर्शयति सचेति
अथवा ज्ञानेनाया अभूत्वा भाविकार्यत्वरूपकादाचित्कत्वरूपेणासहेतुकत्वानुमितावितरबा
धज्ञानहेतुकत्वेऽलाभः सुखादीनां ज्ञानतनाहेतुत्वे व्यभिचारात् ज्ञानतांप्रति यत्कारणमसाधा
रणं तस्यैव ज्ञानमितिसंज्ञेति मात्स्य यस्य सम्यावेतेनेत्सप्यकादाचित्कत्वेनेत्यर्थः तत्स्वबनायैवज्ञा
नेनातेऽपि ज्ञातिरस्यस्य सहेतुकेऽर्थः इतरबाधप्रदर्शनायाह सचेति ज्ञानमात्रं पूर्वमित्यनेन घटादि
रूपहेतुजन्यतामात्रायसिद्धसाधननिरासः यत्सत्वेपि यत्कादाचित्कं तत्तदन्यहेतुसाध्यमित्यभिप्रायः
अन्वयव्यतिरेकाभ्यां विशिष्टेन ज्ञानेनेत्यर्थः यदन्वयव्यतिरेकविशिष्टं तदेव ज्ञानमुच्यतेऽत्यभिप्रा
यः ज्ञानस्यातीन्द्रियतयान्वयव्यतिरेकसहचारग्रहासंभवात् अवधार्यतेऽपि इतरबाधसहकृतेनेश्वरो
क्तानुमानेन विषयीक्रियतेऽर्थः एवं क्रमेण ज्ञानजन्यत्वग्रहे तदन्यथानुपपत्त्या पर्यवसितविषयतां २०

150

15। नीत्यर्थः प्रस्तुतयाज्ञनितयेत्यर्थः गृहीतइति गृह्यमाणइत्यर्थः एकदेवोभयोर्विषयत्वेनातीतार्थानन्वयात्
अर्थापत्त्यैवेत्येवकारेणगृह्यतेइत्यनंतरंबोध्यः तेनभट्टमतेनैयायिकानुमितानुमितिगृहीत्वात्प्रामाण्य
स्यनदोषः ततःप्रामाण्यज्ञानाहित्यर्थः ज्ञानमात्रमितिमात्रपदेनप्रामाण्यव्यवच्छेदःगृह्यतेविषयीक्रि
यते अनुव्यवसायेनेतिशेषः ततः अनुव्यवसायानंतरम् फलप्रदर्शनेनेति समर्थप्रवृत्तिरूपफलजन
कज्ञानेनेत्यर्थः अवधार्यतइति अनुमीयते सर्वस्मिन्मीमांसकमतेदूषणीयेप्रथमतोभट्टाभिमतांज्ञातता
दूषयितुमाह ज्ञाततेति ज्ञातता नामकश्चिद्धर्मस्तस्याप्रामाणिकोभवेत्तदातदन्यथानुपपत्त्याज्ञानेगृह्यमाणे
तत्प्रामाण्यमपिगृह्यतेइतिवक्तुंशक्यतेतत्रैवप्रामाण्याभावइतिभावः सम्यक्पयाद्दूषयितुमेवपरमतंवि
विच्यदर्शयति स्वहंकिलेति ज्ञानेजातइति नचतन्मतेज्ञानस्यातींद्रियतयाऽस्मेवकथंनिश्चितमि
तिवाच्यं घटविषयकेछपायत्रघटज्ञानमनुमितंतद नंतरंज्ञाततापत्त्यक्षं तत्रैवज्ञाततांप्रतिज्ञानस्यहेतु
तागृहसंभवात् प्रतिसंधीयतइतिप्रत्यक्षविषयीक्रियतइत्यर्थः तस्यजन्यत्वंसाधयति तेनेति ज्ञानोत्पत्त्युत्तर
कालीनप्रतिसंधानविषयत्वेनेत्यर्थः तथाचज्ञाततायोधर्मोज्ञानोत्पत्त्युत्तरकालोत्पत्तिकः तत्पूर्वकालानु
त्पत्तेः।

गो. त्र. ओपेणाह स्वभावादेवेति ज्ञाततोत्पत्तिपक्षे दोषमाह इतरथेति न चैतत्तथापि विषयत्वस्वरूपसंबंधस्याभा
७७ वात्कथं विषयत्वमिति वाच्यं तत्राप्यतीतानागतस्वरूपसंबंधसंभवात् मतेन पित्रादिना पुत्रादेः संबंधवत्
152 ज्ञाततापत्त्यधिकरणतयाद्दनुत्वेन संभवति श्चैवहूमित्वाभावात् ज्ञानस्वरूपत्वाद्वा विषयविषयीभावसंबं
धस्येति भावः ननु घटत्वादिधर्मनिष्ठैव ज्ञातता वा आस्वरूपत्वादिरूपपरंपरासंबंधेन तत्संबंधिनि ज्ञानविष
यत्वमिति नातीतादेर्ज्ञानविषयत्वक्षतिरित्यत आह किंचेति तत्रापि ज्ञाततायामपीत्यर्थः प्रसंग इति ज्ञातता
तरस्येति शेषः अस्तु को दोष इत्यत आह तथा चेति स्वभावादेवेति अनतिरिक्तमिति शेषः तेन स्वभावानति
रिक्तं विषयत्वस्वरूपात्मकमित्यर्थः ननु स्वरूपसंबंध इत्यत्र विषयस्वरूपमेव ज्ञानविषयत्वमित्युक्तौ ज्ञानोत्प
त्तेः पूर्वमपि ज्ञातो घट इति प्रतीत्यापत्तिः विषयस्य घटादेः सत्त्वात् अथ ज्ञानस्वरूपं तदा ज्ञानविषयो घट इति सद्व
योगानुपपत्तिः ज्ञानस्वरूपस्यैव विषयताध्यत्वात् ज्ञानस्यातीतदशायां ज्ञातो घट इति प्रतीत्यनुपपत्तिश्च ज्ञानस्व
धा रूपसंबंधाभावात् तस्माद्विषयत्वमतिरिक्तं वाच्यं अतिरिक्तस्य नित्यत्वे विषयस्वरूपपक्षोक्तदोषाज्जन्यत्वे
वाच्ये तत्र चैकारणाकांक्षायामुपस्थितज्ञानस्यैव तथात्वमावश्यकमिति तदेवास्माभिर्ज्ञाततेत्यभिधीयत इति
तन्मतमभ्युपेत्य तथापि स्वतः प्रामाण्यग्रहो न संभवतीत्याह अस्तु वेति तन्मात्रेणेति अप्रमसाधारणज्ञान
मात्रजन्यज्ञातताया मात्रेणेत्यर्थः इत्थं च ज्ञाततान्यथानुपपत्त्या तदुपपादकं ज्ञानमात्रं कल्प्यते न प्रमेति भावः

153 ज्ञानस्य दुरूपपत्ति एवंचेति ज्ञानज्ञाततयोः कार्य्यकारणभावगर्भेऽस्तीत्यर्थः तत्रार्थापत्तिकारणीभूतामन्यथा
नुपपत्तिं दर्शयति ज्ञानजन्योसाविति घटत्वविशिष्टस्य ज्ञाततावत्त्वे घटविशेष्यकघटत्वप्रकारकज्ञानं वि
नानुपपन्नमिति ज्ञाताज्ञातादृशज्ञानविषयत्वं घटस्यार्थापत्त्याविषयीक्रियते तत्र च ज्ञाने प्रामाण्यघटकी
भूतपदार्थोपस्थितेः प्रामाण्यमपि विषयो भवतीति भावः भट्टमतमुपसंहरति तेनेति ज्ञाततयेति कारणं विना
नुपपद्यमानयेति शेषः इदमुपलक्षणम् घटो विशिष्टज्ञानविषयः विशिष्टज्ञाततावत्त्वात् यन्नैवं तन्नैवम् य
था पटः इत्यनुमितिरपि बोध्या ज्ञातो घटः इत्यादिप्रतीतेर्ज्ञानविषयत्वमेव विषयः इति ज्ञाततायाः प्रमाणाभावइ
त्याह ज्ञानविषयत्वेति न केवलं प्रत्यक्षप्रमाणेन ज्ञातता सिद्ध्यति किंतु ज्ञानविषयत्वान्यथानुपपत्त्यापि ज्ञा
तता सिद्ध्यतीत्याह नन्विति ज्ञातत्वेति अभेदेन विषयविषयिभावेनेत्यर्थः घटज्ञानयोरिति घटे विद्यमाने
पि घटज्ञानस्योत्पत्तिं विना ज्ञात इति नास्ति तयोरभेदे इति ननु विषयतया प्रत्यक्षजनकत्वमेव घटस्य तद्विष
यत्वमस्तीत्यत आह तदुत्पत्त्येति तस्मादुत्पत्त्येत्यर्थः ज्ञानविषयत्वान्यथानुपपत्तिरूपं ज्ञाततायाः प्रमाणं द
र्शयति तेनेदमिति अनुमीयते निश्चीयते अर्थापत्तिरूपत्वात् ज्ञानजनितं किंचिद्धर्माधारत्वं विना घटस्य ज्ञा
नविषयत्वमनुपपन्नमिति तादृशो धर्मो ज्ञातताऽरूपः कल्प्यते इति भावः विषयतास्वरूपसंबंधविशेषस्त्वि

विषय।

·रा· षयत्वापत्तेः तस्मादनुव्यवसायेनैव विशिष्टं ज्ञानमेव गृह्यते इति स्वीकरणीयम् एवं गुरुमते पि व्यवसायस्यैवानुव्यवसा
७८ यरूपत्वात्तेन दोषो तुल्यम् एवमनुव्यवसायस्य प्रामाण्यसंशये व्यवसायस्य प्रामाण्यानिश्चयात् तु व्यवसाय प्रामाण्यनिश्च
154 यासंभवमनुव्यवसायांतरं कल्प्यं तत्राप्य प्रामाण्यसंदिग्धानवस्था प्रसिद्धमेतत् तथा घटज्ञानस्य प्रामाण्ये तेनैव गृह्य घटज्ञानप्रा
माण्यज्ञानस्यापि प्रामाण्ये तेनैव घटज्ञानेनेत्येवं क्रमेणानंतकोटिप्रामाण्यानां घटज्ञानविषयत्वे विषयानंत्यं स्या
गुरुमते सर्वमीमांसकमते पि अनभ्यासदशापन्नजलादिज्ञाने इदं ज्ञानं प्रमा न वेति सर्वजनानुभवसिद्धसंशया
नुपपत्तेः संशयानुरोधेन ज्ञानरूपधर्मिज्ञानस्यावश्यकत्वात् ज्ञानरूपधर्मिग्रहे च तत्प्रामाण्यस्यापि ग्रहात् को
टिनिश्चयसत्वेन संशयाभावात् प्रामाण्यनिश्चयस्य तु प्रवृत्त्यैकत्वं नास्तीति प्रागेव दर्शितं एतत्सर्वं मनसि कृत्वैवो
क्तम् ज्ञाने [illegible]मानस्य त्वत्स्वत एव ग्रहोचितो न पुनरनुमानेनेत्यलं बहुना तत्र प्रामाण्यानुमाने हेतोः समर्थप्र
वृत्तिजनकत्वस्य ज्ञाप[illegible]नाय समर्थां प्रवृत्तिं दर्शयति तुमाह जलज्ञानानंतरमिति फलवती फलप्रा
प्तिजननी अफलवती तद्भिन्नेत्यर्थः तत्र तयोर्मध्ये समर्थेति अन्यासमर्थत्वाभावः तथा समर्थप्रवृत्त्यजनने य
कृतासंबंधेन ज्ञानधर्मरूपयेति हेतुरयम् प्रामाण्यमित्यस्य विवरणं याथार्थ्यं यथार्थत्वमित्यर्थः अनुमानमेवाह
विवादेति आद्यमिकज्ञाने प्रामाण्यसाधने अन्वयदृष्टांताभावाद्व्यतिरेकव्याप्तिमुदाहरति यन्नेति न तु व्यतिरे
कव्याप्तिग्रहः एवं कथं भविष्यति साध्यस्याप्रसिद्ध्या व्यतिरेकस्याप्यसिद्धेरिति चेन्नैवम् यत्रयत्र जलत्वाभाववद्विशे
ष्यकजलत्वप्रकारकत्वादिरूपमप्रामाण्यं तत्रतत्र समर्थप्रवृत्तिजनकत्वाभाव इति व्यतिरेकव्याप्तिग्रहे पक्षे व्यापका
भावस्य समर्थप्रवृत्तिजनकत्वस्य सत्वात् व्याप्यस्याप्रामाण्यस्याभावरूपं प्रामाण्यं सिध्यतीति नाप्रसिद्धिः अत एव प्र २२

ननु ज्ञाततातविशेषेण प्रमितत्वरूपेण प्रमापि कल्पयितुं शक्यत एवेत्यत आह ज्ञातताविशेषणेनेति ननु ज्ञा
155 ततायां प्रमात्वान्यत्वरूपविशेषोपग्रहात्तस्य तदा हेतुज्ञानादेव साध्यसिद्धेरनुमितिस्यान्नैवः अन्यथा हेतोरेवाज्ञा
नादिति चेन्न ज्ञाततावत्प्रमितताया अखण्डपदार्थरूपत्वात् प्रमात्वेनेति प्रमाव्याप्येनेत्यर्थः कुत इति येनैव
रूपेण गृह्यते तेनैव तत्प्रामाण्यमपीत्येवं क्रमेण तज्ज्ञानग्राहकग्राह्यता प्रामाण्यस्य कुत इत्यर्थः ज्ञाततामात्रेण
ज्ञानमात्रज्ञानेऽपि प्रामाण्याग्रहात् गौ ज्ञानग्राहकत्वस्य प्रामाण्यग्राहकत्वव्याप्यत्वाभावादित्यर्थः अथ प्रमि
ततान्यथानुपपत्त्या प्रमा कल्पनेऽप्येवमप्रामाण्यस्य स्वतस्त्वमित्युच्यते इति चेदप्रमिततान्यथानुपपत्त्याऽप्रमा
कल्प्यते इत्यप्रामाण्यस्यापि स्वतस्त्वं स्यादिति शङ्कोत्तराभ्यामाह अथ केनचिदित्यादिना ज्ञानप्रामाण्य इति प्रमारू
पेण ज्ञानं गृह्यत इत्यर्थः एवमग्रेऽपि एवमिति केनचिज्ज्ञानग्राहकेण गृहीतत्वादित्यर्थः अप्रामाण्यमपीति ज्ञातता
न्यथानुपपत्त्या ज्ञानमात्रग्रहेऽपि कदाचित्प्रामाण्यस्याग्रहादिति भावः परत इत्यस्यार्थमाह ज्ञानेति ज्ञानमात्र
नः ग्राहकादित्यर्थः अन्यथा सर्वस्यैव प्रामाण्यग्रहस्य ज्ञानग्राहकत्वाविशिष्टत्वानुपपत्तेः इदं चास्मन्मतेऽप्यविरुद्ध
मिति दर्शयति ज्ञानेति प्रामाण्यविनेति शेषः तेन ज्ञानमात्रग्राहकादनुव्यवसायादन्येनानुमानेन प्रामाण्यं गृह्यते
इति प्रामाण्यग्रहस्य परतस्त्वमिति भावः एतेनानुव्यवसायस्य प्रामाण्यग्राहकत्वप्रदर्शनेन नामिश्रमतगुरुमतयोर्दूष
णं हृदि स्थमिति बोध्यं तथाहि अनुव्यवसायो नाम ज्ञानस्य मानसप्रत्यक्षं तत्र घटादेर्व्यवसायोपस्थितत्वाज्ज्ञानमंशे क्रि
यते तत्र ज्ञाने विद्यमानस्यापि घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपस्य प्रामाण्यस्य पूर्वमनुपस्थितेन ज्ञा
माने विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वात् अन्यथा ज्ञाने विद्यमानत्वात्प्रमेयत्वादेरखण्डधर्मस्यानुव्यवसायादि

गो.श. उभयसहचारस्यैव गृहीतत्वादित्यर्थः अभ्यासदशापन्नस्येति अत एवाभ्यासदशापन्नस्थले प्रवृत्तिः पूर्वप्रमा
०९ त्वं गृह्यते इति भवद्भिरपि स्वीक्रियते सर्वत्रानुमितिरूपः समर्थप्रवृत्तिजनकत्वं देशे गौरवहीनत्वात् अतस्त्वे
156 स्वत एव प्रामाण्यग्रह इति निरस्तम् तज्जातीयत्वेऽपि हेतुत्वसंभवात् उपसंहरति परत इति ननु प्रमाण
वत्तु प्रपञ्चनिरूपणे सर्वाहुल्यमवधृतं भवद्भिः किमिति संक्षेपेणैव निरूपितमित्यत आह वक्तव्यं ध्येयेति पु
ष्कलो नायोल्लेशः संक्षिप्तसारभूतमेतत् भागस्तु उक्तिरूपेण वे किमिति वर्णकं क्रियाविशेषणम् लोकोक्तिरेव
कथमित्यत आह बालेति उक्तं स्तोकोपकृतं रूपारोपयुक्तिकथने सारासारविवेकेन शेषं ग्रहणसाम
र्थ्यरहितस्याभ्युत्सन्नस्य कुत्रापि बोधो न स्यादिति भावः ननु तर्हि भवद्भिरेव किंचित्संक्षिप्तं कल्पितमि
ति तदध्ययनादिना कथं शास्त्रार्थबोधो भवेदित्यत आह यत्नाद्रूपेलिमिति क्रियाविशेषणं शास्त्रस्य
सारभूतमेव वर्णितमिति भावः ॥ ओमिति श्रीप्रमाणपरिच्छेदः ओं श्रीमद्राधाकृष्णाभ्यां नमः ओम् ॥
ओं संग्रहस्तु देशान्तरेण प्रमाणनिरूपणानन्तरं प्रमेयनिरूपणे क्रियमाणे शिष्याववोधनाय प्रतिज्ञानीते प्रमाणानीति तत्र प्र
मेयनिरूपणमात्रस्यैव प्रमाणाधीनत्वमिति बोधयितुं प्रमाणानीत्युक्तानीति प्रमाणकथनस्य पूर्वकालतावोधनम् तत्रापि
प्रमाविषयत्वं प्रमेयत्वमिति प्रमेयसामान्यलक्षणस्य स्फुटतया तदभिधाय तद्विशेषजिज्ञासायां प्रमेयविभाजक
त्वं दर्शयति आत्मेति प्रथमोद्दिष्टत्वादात्मानमादौ निरूपयति तत्रेति तेषु मध्ये इत्यर्थः ज्ञानत्वं नाम सामान्यवि
शेषस्त ज्ञानाधिकरणत्वमात्मसामान्यलक्षणम् लक्षणतावच्छेदकं चात्र बुद्ध्यादिमत्वे सति समवायेन बोध्यातेन विशिष्यत्वा

आत्मत्वेन ना

157 प्रथमं जललक्षणेऽप्रामाण्याभावः स्यात्कारिकायां साध्यविशेष्य विशेष्यकैवानुमितिः विशेषणज्ञाना
भावेन साध्याविशिष्टपक्षानुमित्यसंभवात् इतरकालेऽभावरूपप्रामाण्यस्यापि मानसादिबोध्य इत्याशयेन प्र
प्रमाणेऽप्रामाण्याभास इति प्रमाणवदप्रामाण्य इति बुध्यत्यत्या इदं रजतमिति भ्रम इत्यर्थः पक्षसाध्यादिकं विशिष्य प्रति
पादयति अत्रेत्यादिना फलवदिति वस्तुतो यत्समर्थप्रवृत्तिजनकं तदेव ज्ञानकज्ञानत्वेन पक्ष इत्यर्थः याथार्थ
पं५ मिति अयथार्थत्वाभावरूपमित्यर्थः स्वोक्तं युक्तः ननु प्रमाकरणत्वमिति प्रमायाः करणत्वं तत्यो भावः इ
वोत इति न्यायेन प्रमात्वं करणत्वं येनात्राप्रामाण्यमित्यर्थः स्मृत्यामिति स्मृतौ कृपयथार्थप्रवृत्तिजनक
त्वरूपो हेतुर्वर्तते साध्यं च स्मृतिभिन्नज्ञानत्वगर्भप्रमात्वं प्रमाकरणत्वं वा नास्तीति व्यभिचारापत्तिरित्य
र्थः न वर्तित त्सकारकत्वरूपं यथार्थत्वं तु तत्राप्यस्तीति न व्यभिचार इति भावः इदमुपलक्षणम् प्रमाक
रणत्वरूपप्रामाण्यपक्षे बोध्योऽपि बोध्यः केवलेति यद्यपीदं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वादित्यनुमा
नस्याभ्यासदशापन्नज्ञानपक्षकस्यान्वयव्यतिरेकित्वमेव सपक्षविपक्षयोः प्रमाभ्रमरूपज्ञानयोर
त॰१ योः सत्वात् तथाप्यनभ्यासदशायां तु रूपेण प्रामाण्यस्याग्रहणात् तत्रान्वयव्याप्तेरग्रहात् केवलव्य
तिरेकव्याप्तेरेव पुरःस्फूर्तिकतया तथाभिधानमिति बोध्यम् तद्दृष्टान्तेन अनभ्यासदशापन्नज्ञान
दृष्टान्तेनेत्यर्थः तज्जातीयत्वेनेति समर्थप्रवृत्तिजनकत्वरूपजातीयत्वेनेत्यर्थः अन्वयव्यतिरेकीति

गौ॰ प्र॰ ८० त्मत्वसिद्धिः लाघवस्य तुल्यत्वात् केचित्तु ईश्वरे जीवे चात्मपदस्य तुल्यप्रयोगदर्शनान्नाना शक्तिकल्पने गौरवात् लाघवे
158 नात्मपदशक्यतावच्छेदकतयात्मत्वजातिः सिध्यति कार्यत्वावच्छेदकादिवच्छक्यतावच्छेदकेपि लाघवस्य तुल्यत्वात्
अत एव गुणपदाधिगतो गुणपदशक्यतावच्छेदकतया गुणत्वजातिर्भट्टाचार्यशिरोमणिभिः स्वीकृतेति वदन्ति ॥ नन्वा
त्मत्ववान्निरूपत भेदाग्रहन्तः तथाहि केचिन्मते देह एवात्मा ब्राह्मणोऽहं जानामि मनुष्योऽहं करोमि गौरोऽहं सुखी भाग्यवा
न्मम पुत्रो जात इति प्रतीतेः ब्राह्मणत्वादीनां ब्राह्मणत्वाद्यवच्छिन्नशरीरवृत्तित्वात् इन्द्रियमेवात्मेत्यपरे चक्षुः पश्य त्य
ति मनो जानातीति प्रतीतेः अन्ये तु सर्व एवात्मा घटपटादिकं स वेद खल्विदं ब्रह्मेत्यादिश्रुतेः तस्मादत्र केन मत्यात्मत
त्त्वमवद्भिर्मन्तव्य आह देहेन्द्रियादीति एतत्साधकमनुमानं वदन् प्रतिसन्धेयात्काविद्युक्तिरुच्यते देहस्यात्मत्वे वा
ल्येनुभूतस्य यौवनादिस्मृतिर्न स्यात् बालशरीरनाशाद्वर्तमानशरीरे अनुभवाभावेन स्मरणासंभवात् न च
बाल्ययौवनयोरेकमेव शरीरं वाच्यम् परिमाणभेदेन द्रव्यभेदोन्नयनात् सर्वपरिमाणस्य स्वाश्रयनाशनाश्यो
त्पत्त्येवापरपरिमाणोत्पत्तेः ननु देहावयववृत्तिरेव संस्कारोऽस्त्विति वाच्यम् तदा देहावयवेन हस्तादिनानुभू
तस्य पदार्थस्य हस्तादिशोदेशकरणं न स्यात् नापि बाद्ये ज्ञातस्य स्तन्यपानादाविष्टसाधनताज्ञानं विना तत्र प्रवृ
त्तिर्न स्यात् तद्देहे अनुभवाभावात् अस्मन्मते तु जन्मान्तरीयानुभवजन्यसंस्कारात्स्मृतिः अत एव नेन्द्रिया १ प्रमे
णां तथात्वे चक्षुषानुभूतस्य घटादेश्चक्षुर्नाशे सति कथं ध्येयस्मृतिविषयत्वाभावापत्तेः सर्वस्यैवात्मत्वे ताना

159 दिनात इति तानाशे नातिप्रसंगः एतदभावे च सामान्यपदं सामान्यस्य समवेतत्वात् नन्वात्मत्वजातौ किं मानं अहं सुखी
त्याद्यनुगमप्रतीतिरिति चेन्न परात्मनोऽप्रत्यक्षतया एकव्यक्तौ तादृशानुभवस्य साधकत्वात् अन्यथा घटत्वादा
वप्यनुगतबुद्धिसत्वेन तथात्वापत्तेः न च सुखादिसमवायिकारणतावच्छेदकतया तत्सिद्धिः ईश्वरात्मनि कादाचि
त्कसुखाद्यभावेन तत्र तदसिद्धेः न चारण्यस्य दुःखादिविशेषस्य सुखादिस्वरूपयोग्यतानित्यस्य स्वरूपयोग्यस्य फलाव
श्यभावनियमात् न चात्मत्वं जीवात्मवृत्त्येव शरीरादिप्रवृत्त्यवच्छेदकस्यैवात्र लक्ष्यत्वे नेश्वरस्येति वाच्यम् मोक्षजनकी
भूततत्त्वज्ञानस्य विधेयतया उपास्यत्वेन तज्ज्ञानकतया चेश्वरस्यैवात्र प्राधान्येन लक्ष्यत्वात् तस्माज्ज्ञानाश्रयत्व
मत्वं ज्ञोपाधिर्वा आत्मत्वं कथमुक्तं सामान्येनेति चेदत्रोच्यते सुखसमवायिकारणतावच्छेदकतया सिद्धस्यात्मत्वस
आतेश्वरवृत्तित्वं स्वीक्रियते लाघवात् जीवेश्वरसाधारणात्मतत्त्वज्ञानत्वेन सामान्यतः कार्यकारणभावो विरहात
नतु जीवात्मतत्त्वज्ञानत्वेनेश्वरात्मतत्त्वज्ञानत्वेन च हेतुताद्वयं गौरवात् विशेषहेतुतायां तु तत्तन्मुक्तिं प्रति तादृशाव
कि द्वयस्य तद्व्यक्तित्वेन हेतुतोभयवादिसिद्धा तादृशोभयात्मतत्त्वज्ञानस्य मुक्तिं प्रति हेतुतायां चेश्वरप्रकरणे तमेव
विदित्वातिमृत्युमेतीति तथात्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्या ई° ३
दिश्रुतिरेव प्रमाणं न च सुखसमवायिकारणत्वादेरीश्वरवृत्तित्वे नित्यस्येत्यादिव्याप्तिभंग इति वाच्यम् तादृशा
श्लोमानाभावात् धर्माधर्मरूपसहकारिविरहेणैवेश्वरे सुखाद्यभावोपपत्तेः यद्वा द्व्यणुकारंभकपरमाणुवृत्तिक्रिया
साधारणविलक्षणक्रियाप्रतिप्रयत्नवदात्मसंयोगस्येश्वरसंयोगसाधारणस्य हेतुत्वेन तदवच्छेदकतावच्छेदकतया

गौ.प्र.गा मवृत्तित्वप्रतीतिरेव भ्रमरूपा तु विनिगमकाविरहादिति वाच्यम् शरीरादिभेदेन अस्य भिन्नानामनुपप
८५ 160 त्तेरेव विनिगमकत्वादिति संक्षेपः नन्वेवं स्वात्मनः प्रत्यक्षसिद्धत्वेपि नात्मत्वस्य सामान्यतासिद्धिर्व्यक्ति
167 भेदग्रहाभावादत आह विप्रतिपत्ताविति परदेहे आत्मसंशये इत्यर्थः यद्वा वादिविवादे ततः सर्वत्र दे
हाद्यतिरिक्तात्मसंदेहे इत्यर्थः इदं च पक्षतासंपत्तये भिहितम् बुद्ध्यादीति बुद्ध्यादेः पक्षे गुणलिङ्गकः
गुणपदस्य धर्मपरतया गुणत्वलिङ्गकानुमितिविषय इत्यर्थः यथा बुद्ध्यादयो द्रव्याश्रिता गुणत्वाद्रूपा
गौ.प्रत्य.८१ दिवदित्यनुमितौ पक्षधर्मताबलात् पृथिव्यादिबाधे ऽतिरिक्तात्मवृत्तित्वं सिध्यतीति भावः अत्र गुणत्व
स्य पक्षधर्मतासंदेहे तस्य भनायानुमानमाह बुद्ध्यादय इति ईश्वरबुद्धेरत्र पक्षत्वं न तस्या धर्मिग्राहकमा
नादेवात्मवृत्तित्वसिद्धेरिति हेतोर्न भागासिद्धिः अनित्यत्व इति चक्षुर्मात्रग्राह्यरूपत्वादिजातौ व्यभिचार
वारणाय सत्यंतम् ध्वंसप्रतियोगिभावत्वं तदर्थः सतीत्यस्य वा भावप्रधानतया सत्त्वे भावत्वे इत्यर्थः तेन
रूपप्रागभावादौ न व्यभिचारः अनित्यद्रव्यकर्मणोर्व्यभिचारादाह एकेन्द्रियग्राह्यत्वादिति द्वीन्द्रियग्राह्ये
विषयताक्षावेकेन्द्रियग्राह्यतानपायादेकेन्द्रियमात्रग्राह्यत्वं तदर्थः यद्यप्येतावतापि चक्षुर्मात्रग्राह्ये तेष रत्वमे
हादौ प्रभायां कर्मणि च व्यभिचारनिरासो न भवति तथापि सत्तागुणत्वान्यद्वीन्द्रियग्राह्यजातिशून्यत्वं विव
क्षितं न दोषः घटादौ वोक्तस्य लेघटत्वादेः कर्मत्वस्य तथाविधजातेः सत्त्वात् अतीन्द्रियस्यापि चक्षुरादे

161 हिमत्वमपि स्यात् सर्वस्य तत्त्वबाधितं भुतेस्तु अगत एव ब्रह्मरूपतया भावनीयत्वमात्रे तात्पर्यं ननु तथाप्यात्म
त्वेन जातिः एकव्यक्तिवृत्तित्वात् सर्वशरीरे आत्मनो भेदाभावात् आकाशवत्सर्वगतश्च नित्य इत्यादिषु
तेः अतो व्यक्तिभेदं दर्शयति प्रतिशरीरमिति शरीरं शरीरं प्रत्येकैक आत्मेत्यर्थः सुखदुःखादिव्यवस्थाव
शादिति हेतुमग्रे दर्शयिष्यति अत्र च शरीराणामेककालीनत्वं योगाजन्यत्वमपि विवक्षितम् तेन क्रमिकानेक
शरीरावच्छिन्नभोगवत्त्वेपि जीवस्य न क्षतिः न वा सौभर्यादेर्योगिनो वैभवासादितकायव्यूहमादाय दोषः तेनै
तच्छरीरावच्छिन्नभोगवान् तुल्यकालीनयोगाद्यजन्यशरीरान्तरावच्छिन्नभोगवद्भिन्न इति रीत्या प्रतिशरीरं
भेदः साध्य इत्यर्थः ननु क्रिया शरीरादावेव संभवति नात्मन इति शरीरादेर्देशान्तरसंचारेपि आत्मनः स्थिरत्वात्
नानात्विकं कथं स्यादित्यत तत्राह विभुरिति सर्वदेशसंयुक्तो नवच्छिन्नपरिमाणवानित्यर्थः ननु विभुत्वेस
त्यपि उत्पत्तिविनाशरूपदः का गतिरित्यत आह नित्य इति उत्पत्तिविनाशरहित इत्यर्थः देहस्यैवोत्पत्तिविनाशेपि
नात्मन इति भावः प्रमाणमाह सवेति अहं सुखी अहं दुःखीत्यादिमानसाहंप्रत्ययविषय इत्यर्थः नन्वेतस्य
तीतिर्न शरीरादिविषयत्वमेव योहं पुत्रमुत्पादितवान् सोहं सुखी योहं सर्ववैरं विहितवान् सोहं दुःखीत्यादि
रूपाहंताप्रत्यभिज्ञानानुपपत्तेः सर्वोक्तरीत्या शरीरभेदादेकेनानुभूतस्यान्येन प्रतिसंधानाभावात् एवं
योहं गौरः स्थितः सोहं श्याम इत्यादिप्रतीतिर्भ्रमानुभवजन्यसंस्कारजन्यत्वाद्भ्रमरूपैव नच सर्वोक्तसुखादेरा

गौ.प्र. नां विशेषगुणत्वाभावे बीजमाह तेहीति सर्वेतिरवाप्त्यपसमवायसंबंधेन सर्वद्रव्यवृत्तिगुणत्वव्याप्यजाति
८२ मत्तत्त्वमर्थः तादृशजातिमद्भिन्नायेगुणास्तेन यत्र विशेषगुणविवक्षितास्तेति भावः तेनात्मगुरुत्वादिवारणा
162 य विशेषणान्तरं न देयम् हेतुदोषाभावेन व्यर्थविशेषणत्वापत्तेः पक्षेहेतौ विशेषगुणत्वस्यासिद्धिवारणा
यानुमानमाह बुद्ध्यादय इत्यादिति अत्रैकेन्द्रियग्राह्यत्वमेकेन्द्रियमात्रग्राह्यत्वम् तच्चैकैकेन्द्रियमात्रग्राह्यो नसं
ख्यादिव्यक्तिविशेषेव्यभिचारीति बाह्येन्द्रियग्राह्यगुणत्वव्याप्यजातिमत्त्वे तदर्थः सत्तागुणत्ववारणा
य गुणत्वव्याप्येति तावन्मात्रेव घटादौ व्यभिचारीति गुणत्वेति सतीति प्रत्यक्षगुणत्वे सतीत्यर्थः तेन गुरुत्वादौन
व्यभिचारः पूर्वोक्तपरिमाणिकविशेषगुणत्वस्य साध्यतायां प्रत्यक्षपदं न देयमेव नच प्रत्यक्षत्वविशेषणेव
तो हेतोर्धर्मादौ भागासिद्धिरिति वाच्यं तेषामप्रत्यक्षत्वेपि हेतेरभावात् अतिरिक्तात्मासिद्धिमात्रस्य बुद्ध्या
दिपक्षतायामपि संभवात् उपसंहरति अतएवेति सिद्धसाध्यमुपसंहरति तस्मादिति अत्र द्रव्यत्वेन रूपेणैव वस्तु
तो पदष्टद्रव्यातिरिक्तं द्रव्यं तदाश्रितत्वं पक्षधर्मताबलात् सिद्धं व्यापकतावच्छेदकरूपेणैव व्यापकस्य भानात् पूर्वा
मात् पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितत्वेन रूपेण साध्यसिद्ध्यर्थं केवलव्यतिरेक्यनुमानमाह प्रयोगस्त्वेत्था
दिना नचात्र साध्याप्रसिद्धिरिति वाच्यम् पूर्वोक्तानुमानेन बुद्ध्यादीनां द्रव्याश्रितत्वस्य पृथिव्याद्यनाश्रितत्वस्य च
सिद्धौ तद्व्य पृथिव्याद्यष्टद्रव्यातिरिक्ते पृथिव्याद्यष्टद्रव्यावृत्तिपदार्थवत्त्वादित्यनुमानेन पृथिव्याद्यष्टद्रव्या

163 स्तादृशद्रव्यत्वादिजातिमत्त्वात् पक्षे हेतोरसिद्धिवारणाय सत्तेत्यादि जातिविशेषणम् बुद्धिसंख्यान्यतरत्वादिध
र्मवत्त्वात्तद्दोषवारणाय जातीति इत्थं च पक्षधर्मतां प्रदर्श्य व्याप्तिमपि दर्शयति गुणान्यत्वेति गुणपदनाश्रितत्वेस
ति गुणत्वव्याघातः तथाहि अनाश्रितत्वे भावस्य द्रव्यसमवायान्यतररूपता गुणत्वेऽप्यनाश्रितत्वे च सामान्यरू
पतेति उभयथापि गुणत्वव्याघात इति भावः एतेन व्याप्तेरप्रयोजकत्वशंकानिरासाय तर्कोऽपि दर्शितः तत्र
पक्षधर्मताबललभ्यात्माश्रितत्वसिद्धये इतरबाधं दर्शयति नेत्यादिना भूतानां न गुण इति पृथिव्यप्तेजोवाय्वा
काशगुणो नेत्यर्थः भूतसमवेतत्वाभावमात्रस्य साध्यत्वे मानसप्रत्यक्षविषयीभूतायाः सत्ताया भूतसमवेतत्वे
न व्यभिचारापत्तेः तेन गुण इति न पक्षान्तर्गतं किंतु साध्यमध्यस्यमेवेति बोध्यम् मानसप्रत्यक्षविषय
त्वे लौकिकप्रत्यक्ष~~विषयत्व~~विषयत्वं बोध्यम् तेन मानसोपनीतभानादिविषये रूपादौ न व्यभिचा
रः व्यतिरेकव्याप्ताबुदाहरति यदीति नात्यन्तेति स्वीयलौकिकप्रत्यक्षविषयीक्रियंते इत्यर्थः दिगा
दित्रयगुणाभावं साधयति नापीति बुद्ध्यादय इत्यनुषज्यते अत्र साध्ये गुणपदं समवेतमात्रपरं व्य
तिरेकभागस्य वैयर्थ्यात् विशेषगुणत्वात् संख्यादिपंचान्यगुणत्वात् साध्यस्य गुणपदं चेत्साध्य
कीकरणीयं तदा संख्यादिगुणान्यत्वादिति हेतुर्बोध्यः व्यतिरेकोदाहरणमाह दिगादीतिते

गो. भिन्नस्यापि सेव कृतयेत्यादि रूपं एकत्वेन सुखं सेव कर्त्तव्यानुभवेदिति भावः तथा चैत्रः सुखी मैत्रो दुःखीत्यादिकमन्य
८२ दैवचित्र्ये एकात्म्ये सर्वस्य सुखित्वदुःखित्वे स्यातां न च यथा शिरसि मे सुखं पादे वेदनेत्यादौ कात्मन्यप्यवच्छेदकभे
164 दाद्व्यवस्था तथा सति चैत्रमैत्रशरीरयोरप्येकात्मनि सुखदुःखाद्यवच्छेदकत्वान्न विरोध इति वाच्यम् तथा
सति तद्वदेव योऽहं मैत्रः सुखी सोऽहं चैत्रः दुःखीत्यादिक्रमेणैकोऽनुभवेत् न चात्मैक्येपि शरीरभेदान्न प्रतिसंधानं
अन्यथा तत्कापि स्वदेहे अहं सुखी अन्यदेहे दुःखीत्यादिप्रतीतिः स्यादिति वाच्यम् पूर्वदेहीयदुःखादेः संस्कारा
भावादेव न स्मरणम् इह तु संस्काराभावे चैत्रवन्मैत्रस्यापि स्वानुभूतसुखादिस्मरणं न स्यात् अभावे का मैत्र
वच्चैत्रस्यापि स्यादिति तथा कश्चिन्मुक्तः कश्चित्संसारीत्यादिकमन्यदपि विभ्रम एव कश्चिदीश्वरः कश्चिज्जी
व इति व्यर्थिकमस्मत्कृतसंयुक्तिमुक्तावल्याम् उद्देशक्रमप्राप्तशरीरलक्षणमिति तस्येति भोगपदार्थं विविनक्ति
सुखेति सुखदुःखयोर्यस्मिन्नशरीये तेन जागेऽव्याप्तिरिति भवेत्पदोपादानम् सुखदुःखोभये तु तत्कालैकभा
गेऽव्याप्तिरित्यन्यतरपदम् तदर्थश्च सुखभिन्नत्वे सति यद्दुःखभिन्नं तद्भिन्नं भवति अनुभवो लौकि
कसाक्षात्कारः तेन नोपनीतभानादावतिव्याप्तिः आपतन पदार्थस्यावच्छेदकः तथा च मिलितपादद्वयं
लक्षणं संपन्नं तेदाहृतयदवच्छिन्नाः इति सुखदुःखान्यतरलौकिकसाक्षात्कारावच्छेदकं शरीरम् प्र
त्यर्थः अवच्छेदकत्वं च स्वरूपसंबंधविशेषः अत्र पादादीनामपि सुखदुःखसाक्षात्कारावच्छेदकत्व

निरिक्त द्रव्यासिद्धौ तदाश्रितत्वरूपसाध्यस्य द्रव्यत्वादौ प्रसिद्धिसंभवात् तादृश्येण साध्यासिद्ध्यर्थमेव तत्तदनु
165 मानप्रवृत्तेः गंधादौ व्यभिचारवारणाय सत्तान्ते आकाशादौ व्यभिचारवारणाय विशेष्यं व्यतिरेकव्याप्त्यनु
सारेणेति यत्त्विति यच्चेति पृथिव्याद्यनाश्रितत्वरूपविशेषणाभावादेव रूपादौ हेत्वभावः विशेष्याभाव
कृत आकाशादौ उभयाभावकृतः पृथिवीत्वादौ बोध्यः अत्रैवानुमाने सामान्यमुखोपदर्शितान्वयव्याप्तिः
प्रदर्श्यते तदायं हेतुरन्वयव्यतिरेक्यपि भवतीति दर्शयति अन्वयव्यतिरेकी चेति सामान्यमुखीं व्या
प्तिमेव दर्शयति योयदिति उपसंहरति तदेवमिति एतेन पूर्वोक्तदेहेन्द्रियादिव्यतिरिक्तात्मसिद्धा तेषां पृ
थिव्याद्युपष्टम्भवागततया तत्र बुद्ध्यादेर्वृत्तित्वासंभवादिति बोध्यम् विभुत्वे हेतुमाह सर्वत्रेति यत्र य
त्र शरीरं गच्छति तत्र तत्रैव तत्कार्यस्य ज्ञानसुखादे रुपलंभादित्यर्थः इदं च यद्यपि मूर्त्तत्वाङ्गीकारेऽपि शरी
रवत्क्रियाभ्युपगमेनोपपादयितुं शक्यते तथापि तस्याणुपरिमाणवत्त्वे सुखादेरणुदेशत्वात्तीव्रदुःखप
योः प्रसंगः मध्यमपरिमाणवत्त्वे च सावयवत्वावश्यकत्वे तदवयवपरम्परोत्पत्तिविनाशकारणकल्प
नागौरवात् परममहत्परिमाणवतो नित्यस्य कल्पने लाघवमिति लाघवज्ञानसहकारात् पूर्वोक्तधर्मिग्राहक
मानेन तस्यैव सिद्ध्यतीति भावः नित्यत्वे मानमाह विभुत्वादिति प्रतिशरीरभिन्नत्वे मानमाह सुखादीनामि
ति वैचित्र्याद्व्यतिशरीरमेक एवैवात्मेत्यादत्पर्यः यद्येकस्य विभोर्जत्वेन सुखं कस्यचित्सेवकेत याकस्य

गौ.शृ.८४ तिजात्यवच्छिन्नकार्य्यताप्रतियोगिककारणताशालित्वम् एतेन कारणपदस्य व्यापारवत्कारणपरत्वे को
166 लादेरपि विषयेन्द्रियसन्निकर्षरूपव्यापारजनकतयातिव्याप्तिः अत एव विषयसन्निकर्षस्य वारणेऽपि
ऽहेतवारणाय शरीरसंयुक्तमिति विशेषणमिति वक्ष्यमाणस्यासंगतिः फलायोगव्यवच्छिन्नकारणपर
त्वे चासम्भवः इन्द्रियाणां तथाकारणत्वाभावादित्यादिकमप्यास्ताम् आत्मवायोर्व्याप्त्यात्मविशेषगुणोत्प
त्तिं प्रत्येव हेतुत्वमिति तन्नत्यात्वे तस्य लाननिष्ठतद्व्यक्तित्वरूपधर्मावच्छिन्नकार्यतानिरूपितकारणता
शालित्वाज्ज्ञानत्वावच्छिन्नेति शरीरसंयुक्तपदप्रयोजनमाह तथापीति चक्षुर्घटसंयोगादेरतीन्द्रियत्वात्
तादृशासाधारणकारणत्वाज्ज्ञातिव्याप्तिसम्भवो शरीरसंयुक्तमिति यद्यपि संयुक्तपदेनैव सन्निकर्षातिव्याप्ति
निरासे शरीरपदं व्यर्थं तथापि वीतः शंखवदिति विजातीयतानासाधारणकारणेन यननातत्कोतङ्कवीवास
नेन्द्रियगतेविति यच्छरीरकोरेति विजातीयरासनजनके तस्मिन्न तथा भाकाशादिशब्दविषयकाविलक्ष
णज्ञानजनकश्रवणेन्द्रियसंयुक्ते दूषितत्वात्तथा वाव्यासाप्तिवारणाय शरीरपदं बोध्यं तेषामिन्द्रियसंयु
क्तानामेव तथाबोधजनकत्वात् न च शरीरसंयुक्ते श्रवणेन्द्रियसंयुक्ते चेतादृशवायुविशेषेतिव्याप्ति
रितिवाच्यं तादृशवायोर्मानाभावात् इन्द्रियमात्रसंयुक्तस्यैव स्पर्शद्रव्यविशेषस्पर्शविषरूपतथा तादृ श्रे॰
ज्ञानजनकत्वात् भावे वा तदन्यत्वेविशेषणात् अत एव शरीरपदव्यर्थमित्यनभिनिवेशेन मयम् अत्र तो ५
ऽक्ष्यपदव्यावृत्तिमाह शरीरेति आलोकादाविति शरीरवाह्येचक्षुसंसिरालोकस्य हेतुत्वादिति भावः इति केचित

वा०१

पत्त्याप्तिआप्तिवारणायं सावयवत्वे सति इति विशेषणं देयम् शरीरस्यापि मरणकाली नदुःखसाक्षा
रा२ त्कारावच्छेदकतया न व्याप्तिः परिमाणभेदादेरदर्शनेन एवं इत्थं शरीरैकत्वे रोत्सत्त्वेरभावात् भावे वा दारुपा
167 षाणनिर्मितशरीरवत्ता नाद्यनवच्छेदकतया लक्षणत्वात् प्रयत्नकारणमनःसंयोगवद्वत्त्यन्त्यावय
विमात्रवृत्ति जातिमत्त्वं तत्त्वमिति वदन्ति एकशरीरलक्षणमुपसंहरति नवेवमिति तच्च लक्षणान्तरमाह
चेष्टेति अत्रापि सर्वत्र सावयवत्वादिकं बोध्यम् चेष्टापदस्य क्रियामात्रपरत्वे घटादावतिव्याप्तिरत आह चेष्टा
त्विति हिताहितप्राप्तिपरिहारानुकूलक्रियेत्यर्थः प्राप्तिपरिहारौ संयोगविभागौ न तु प्रवृत्तिनिवृ
त्ती तयोः शरीरक्रियाजन्यत्वाभावात् प्रत्युत जनकत्वात् चैत्रेकैकानुपादाने तत्रातिव्याप्तिरिति वृद्धयोरु
पादानम् नन्वेतमन्त्रक्रियारथशकटनौकादीनामपि दृश्यत इति तत्रातिव्याप्तिरिति चेन्नैव शरीरज
न्यतावच्छेदकचेष्टात्वरूपक्रियानिष्ठजातिविशेषतारसध्यात् प्रयत्नवदात्मसंयोगासमवायिका
रणकक्रियात्वं चेष्टात्वमित्यपरे आकाशजन्यदृष्टत्वे शरीरत्वम् चेष्टेति व्याप्तिवारणाय घटद्यत्वे केचित्
क्रमप्राप्तमिन्द्रियं लक्षयति शरीरेति ज्ञानकरणपदं व्यावृत्तिमाह अतीन्द्रियमिति शरीरसंयुक्तेमि
त्यपि बोध्यम् कालादेरिति आदिपद दिगीश्वरसंग्रहः तेषां शरीरसंयोगित्वातीन्द्रियत्वयोः सत्त्वा
दतिव्याप्तिरिति भावः ज्ञानकरणमिति ज्ञानासाधारणकारणमित्यर्थः तेन जन्यज्ञानत्वन्यूनवृ

गौ०कृ० एवं रीत्या गंधविलक्षणत्यर्थो बोध्यः तच्च घ्राणं चेत्यर्थः गंधवत्वात् गंधवत्परमाणवारब्धत्वादित्यर्थः
पृ०८५ तेन न चक्षुर्वोपदर्शितनिर्गंधघ्राणे भागासिद्धिः गंधग्राहकत्वात् गंधग्रहणसाधारणकारणत्वात् तेन न
168 कालादौ व्यभिचारः ननु गंधग्रहणासाधारणकारणत्वं गंधस्याप्यस्ति न तु गंधवत्वमिति व्यभिचार इत्यत
ग्राह्यमिन्द्रियमिति तद्गुणसंयुक्ते गुणत्वव्याप्यजात्या तज्जातीयगुणवदित्यर्थः इदं च सामान्यतो व्याप्ति
दर्शनम् घ्राणं गंधवद्रूपादिषु व्यञ्जकान्यतमाभूतगंधग्राहकेन्द्रियत्वादिति प्रयोगो बोध्यः स्नेहग्राहकं चक्षु
क्षुरादेः स्नेहाभावात् सामान्यतो व्याप्तौ व्यभिचारवारणाय भूतेति पंचकं रूपरसगंधस्पर्शशब्दरूपम्
गंधग्राहकत्वं तन्मात्रग्राहकत्वं तेन मनसि न व्यभिचारः तदुक्तं गंधातिरिक्तातादृशगुणाग्राहकत्वे
सति गंधग्राहकत्वं तेन गंधत्वग्राहकत्वेपि घ्राणस्य नाव्याप्तिः गंधे व्यभिचारवारणाय इन्द्रियत्वादिति व्यति
रेकव्याप्तौ तु गंधग्राहकेन्द्रियत्वादित्येव हेतुर्बोध्यः एवमग्रेपि बोध्यः रसनेन्द्रियं लक्षयति रसोपलब्धीति र
सस्यैवेति पूर्ववत्क्रिरीत्या रसमात्रग्राहकेलाभार्थमेव कारः तत्प्रयोजनं तु पूर्वमुक्तम् अत्र लालावदि
तिरस्कान्तानुरोधादिन्द्रियपदं न देयम् अत्रापि व्यञ्जकत्वं स्वप्रतियोगिकसंयोगद्वारा हेतुर्बोध्यम् तेन न
विषयतयाभिव्यञ्जके रसे व्यभिचारः न वा रसनेन्द्रियसन्निकर्षे अत एव लालायाः स्वकीयरूपाद्यभि

169 वस्तुतस्तु शरीरसंयुक्तमात्रमपेक्षितम् न तु शरीरसंयोगस्यापि तन्नजनकत्वमात्रेणातत्वर्थ्यमिति बोध्यम्
॥ श्रोत्रादिपदग्राह्यविषयतया प्रत्यक्षत्वे कारणशरीरसंयुक्तवस्त्रादिपरिग्रहः ॥ ननु अतींद्रियत्वमिंद्रियजन्यता
नाविषयत्वादिरूपं तथा चात्माश्रयइतिशेत्यत आह लौकिकप्रत्यक्षाविषयत्वस्य तथात्वात् प्रत्यक्षत्वे
ज्ञानाकरणकज्ञानत्वरूपस्याभावमित्यदोषः योगिप्रत्यक्षादिविषयतयाऽसंभववारणाय लौकिके
ति विशेषलक्षणार्थमिंद्रियविभागमाह ज्ञानेति बहिरिति नाधिकानि न वा न्यूनानीति भावः तेन सां
ख्यादिमते एकादशत्वोक्तमतेमनोतिरिक्तपंचेंद्रियाणां तस्य निरासः उद्देशक्रमेण लक्षयितुमाह तत्रेति
तेषु मध्ये इत्यर्थः गंधोपलब्धीति चक्षुरादावतिव्याप्तिवारणाय गंधपदं सुरभ्यसुरभिपरमाणवोर
व्ये निर्गंधघ्राणेंद्रिये व्याप्तिवारणायोपलब्धीति लौकिकसाक्षात्कार इत्यर्थः तेन सुरभिसेदनमित्या
दिगंधोपनीतिभानसाधने चक्षुषि नातिव्याप्तिः साधनत्वं च साधारणकारणत्वे तेन गंधोपलब्धिं ता
नतिरिक्तवृत्तिधर्मावच्छिन्नकार्यताप्रतियोगिककारणताशालित्वम् तेन न कालादृष्टादावतिव्या
प्तिः गंधोपलब्धिविषयतयाऽसाधारणकारणे गंधेतिव्याप्तिवारणायेंद्रियपदं ननु नासापुटं द्रव्यरू
पस्य घ्राणस्य प्रत्यक्षतया अतींद्रियत्वघटितमिंद्रियत्वं न तस्येत्यत आह नासेति नयावाधिष्ठानस्यैव गो
लकस्य प्रत्यक्षत्वेनोऽन्निंद्रियस्येति भावः घ्राणपदस्य घ्राणाधिष्ठाने लक्षणा नानार्थत्वं वाऽवधेयं

मौ० ८६ ञ्जकः व्यजनवातः चामरादिपवनस्तद्व्यावृत्तिरित्यर्थः श्रोत्रं लक्षयति शब्देति शब्दोपलब्धीति अत्रोपलब्धिप
170 दस्य रूपाद्यर्थकं शब्दसाधनमित्यस्यैवसम्भवात् कर्णशष्कुली कर्णरन्ध्रं तदवच्छिन्ननभ इति शिष्टमित्यर्थः एव
कारव्यवच्छेद्यं दर्शयति नत्विति आकाशत्वे हेतुमाह शब्देति शब्दो गुणो यस्य तत्त्वात् शब्दवत्त्वादित्य
र्थः तदपि शब्दग्राहकत्वादिति रूपादिपंचकान्यतमो भूत्वा शब्दमात्रग्राहकेंद्रियत्वादित्यर्थः अत्रमात्रपद
मनसि व्यभिचारवारणाय तथा च चक्षुरादेः रूपमात्रग्राहकत्वाभावेन सामान्यव्याप्तौ व्यभिचारः ले
नादेरपि व्यञ्जनाग्राहकत्वादतो भूतान्तम् अन्यदपि घ्राणस्य लक्षणमत्र बोध्यं मनो लक्षयति सुखादीति
घ्राणलक्षणोक्तरीत्या बोध्यमेवम् आदिपदात् दुःखादीनां परिग्रहणम् सुखोपलब्धिसाधनं दुःखोपल
ब्धिसाधनमिति क्रमेणैकैकगुणघटितमेव लक्षणं कार्यम् अधिकस्य वैयर्थ्यात् अणुपरिमाणमिति
व्यासंगानुपपत्तेरिति वक्ष्यते रूपाद्युपलब्धय इति रूपोपलब्धयो रसोपलब्धय इत्यादिक्रमेण प्रत्येकं पक्षः
करणसाध्या इति असाधारणव्यापारवज्जन्या इत्यर्थः इन्द्रियसंयोगादिरूपव्यापारद्वाराकारणीभू
तकालादिनार्थान्तरवारणाय असाधारणेति व्यापारवदिति विशेषणम् तदर्थश्च जन्यज्ञानत्वव्याप्यवृत्ति
पदनिष्ठधर्मावच्छिन्नकार्यतानिरूपितप्रतियोगिककारणताशालि रूपः पक्षनिष्ठविशेषणेन मानसत्वाव
च्छिन्नकारणेन मनसा रूपोपलब्ध्यादिजननेऽपि न क्षतिः पक्षे रूपोपलब्धौ मानसत्वस्याभावात् इन्द्रि ८६

171 ञ्जकत्वेपि न दृष्टान्तासिद्धिः लालाप्रतियोगिकसंयोगस्य तत्र व्यापारत्वाभावात् न च दृष्टान्तमरतकादि
गंधाभिव्यंजने लालासंयोगस्यापि हेतुत्वान्न थापि दृष्टान्तासिद्धिरिति वाच्यं रसाभिव्यंजकलालाव्यक्ते
र्गंधादिव्यंजकत्वे मानाभावात् जलादावपि विभेदेन त्वचस्पर्शाभिव्यंजकत्वाभावे सति रसाभिव्यंजकत्वादित्ये
व परत्वाद्घाणस्यैवेत्यादेः अत एव हेतौ न द्रव्यपदं देयम् रूपादिष्वित्यस्य परकीयेष्विति विशेषणं दय
मितिगतार्थं गोलकसंयोगस्य रसाभिव्यंजकत्वं नास्ति अवश्यकल्पनीयेन्द्रियसंयोगेनान्यथासिद्धेः ह
रीतकीभक्षणोत्तरं जलपाने मधुररसप्रतीतौ तु न हरीतक्यवयवानां हेतुत्वं किन्तु तेषां रसस्यैवेति न
व्यभिचारः चक्षुर्लक्षयति रूपोपलब्धीति रूपसमवायिकारणघ्राणेति व्यभिचारणायोपलब्धीति
रूपादिष्विति रसग्राहकत्वे सति रूपग्राहकत्वादित्यर्थः मनसि व्यभिचारवारणाय सत्यन्तं अत्र रसप
दस्थाने गन्धस्पर्शशब्दपदप्रक्षेपेण हेत्वन्तरसत्त्वेनापि एवं स्थितिः अभिव्यंजकत्वं त्रसरेणुकरीत्या ते
न न रूपग्राहके रूपसन्निकर्षे वा व्यभिचारः आलोकोत्र दृष्टान्तो बोध्यः त्वगिन्द्रियं लक्षयति स्पर्शेति
त्वक्स्थाने मितित्वविधिवर्म्मो स्थितिस्थाने स्थितिर्यस्य तत् त्वगधिष्ठितमित्यर्थः रूपादिष्विति अत्रापि पूर्ववो
क्तहेतुर्व रूपपदस्थाने स्पर्शपदहेतुत्वेन बोध्यम् अंगेति अंगस्य सन्निधि त्वसत्वे स्वेदरूपं न स्पर्शे त्वाभिव्य

नै०८७ नेति निरूपयितुं प्रमाणत्वेन रूपेण पृथगुपदेशः एवं प्रमेयस्यात्मादेरात्मत्वादिप्रकारकज्ञानमेव मोक्षप्रयोजक
172 म् नैव घटादिसाधारणद्रव्यत्वप्रकारकमिति बोधयितुं पृथगुपन्यासः एवं सर्वं प्रबोध्यम् परस्परासंकीर्णास्तु सप्तै
व पदार्था इति न्यायवैशेषिकयोः समाः किंतु नैयायिकाभिमतभावपदार्थोपि स्वशास्त्रोक्तः वैशेषिकाणां स्वशास्त्रानु
क्तोपि न्यायदर्शनरूपसमानतंत्रसिद्धांतसिद्ध इति विशेषः तत्र तेषु द्रव्यादिषु मध्ये द्रव्यत्वं लक्षयति समवायीति
नन्वत्र कः समासः समवायि च तत्कारणं चेति कर्मधारये रूपादावतिव्याप्तिः तेषामपि रूपत्वादिसमवायित्वाद्रू
पादिकारणत्वाच्चेति समवायिकारणमस्येति बहुव्रीहावपि स एव दोषः रूपकारणस्य घटादे रूपादिसमवा
यित्वात् न च समवायिपदं कार्यसमवायिपरं तथा च कर्मधारय एवेति वाच्यम् कार्यसमवायित्वमात्रस्यै
व द्रव्यलक्षणत्वे कारणपदवैयर्थ्यादिति चेन्मैवम् सर्वोक्तसमवायिकारणलक्षणस्यानुसरणीयत्वात् तथाहि
समवायावच्छिन्नकार्यतानिरूपिततादात्म्यावच्छिन्नकारणताशालित्वं समवायिकारणत्वं अत्र विषयतावच्छिन्न
स्वालौकिकप्रत्यक्षनिष्ठकार्यतानिरूपिततादात्म्यावच्छिन्नकारणताशालिनि घटत्वादावतिव्याप्तेर्निरूपितांतम्
असमवायिकारणे रूपादावतिव्याप्तिवारणाय तादात्म्येति अत्र न कस्यापि पदस्य वैयर्थ्यसंभावना कार्यसम
वायित्वमित्यस्य यदि कार्यवृत्तिसमवायवत्त्वमर्थस्तदा घटरूपेपि स्ववृत्तिसमवायसत्त्वादतिव्याप्तिः यदि च कार्यप्र ८७
तियोगिकोयस्समवायस्तद्वत्त्वम् तथापि स एव दोषः समवायस्यैकत्वात् यदि कार्यप्रतियोगिकत्वविशिष्टस्याधि

173 यसन्निकर्षेणार्थान्तरवारणाय प्रकारवदिति क्रियात्वादिति क्रियते इति क्रिया कार्यत्वादित्यर्थः धा
त्वर्थत्वादिति कश्चित् इन्द्रियानन्तरमुद्दिष्टानर्थान्निरूपयति अर्था इति तेषां च पदार्थत्वं पदजन्यज्ञान
विषयत्वरूपं लक्षणं स्फुटमिति न प्रदर्शितम् षट्पदार्था इति भावरूपा इति शेषः सामान्यः भावोऽभाव
श्चेति द्विधा पदार्थविभागो बोध्यः अभावस्यापवर्गोपदार्थत्वे यथा ष्ठाध्यायेन निरूपयिष्यमाणत्वात् भा
वपदार्थान्विभजते तेषामित्यादिना भावाख्याः इत्यनेनाभावस्यापि पदार्थत्वं सूचितं ननु प्रत्यक्षप्रमाणस्ये
न्द्रियस्य द्रव्यरूपत्वमनुमानादीनां ज्ञानरूपत्वाद्गुणत्वम् प्रमेयस्यात्मादेः कस्यचिद्द्रव्यत्वे बुद्ध्यादेर्गुण
त्वम् अपवर्गस्याभावरूपत्वम् संशयस्य गुणत्वम् प्रयोजनस्य सुखस्य गुणत्वम् अन्यस्याभावत्वे दृष्टान्त
स्य महानसादेर्यथायोग्यं द्रव्यगुणादिरूपता सिद्धान्तस्याङ्गीकृतपदार्थरूपस्य द्रव्यादिरूपता निष्प्रपरूप
त्वे गुणत्वम् अवयवानां शब्दत्वाद्गुणत्वम् तर्कस्य विपरीतज्ञानरूपस्य गुणत्वम् निर्णयस्यापि तथात्वं वा
दादीनां त्रयाणां ज्ञानात्मकानां गुणत्वम् एवं हेत्वाभासानां दुष्टत्वे हेतुतारूपता कस्यचित्समवायरूपता
कस्यचिदभावरूपता एवं क्रमेण तेषु षोडशपदार्थानां सप्तपदार्थान्तर्गतरूपता तथा च प्रमेयपदेन वा प्रमे
यविभागमध्यस्थितार्थपदेन सर्वेषां लाभात् किमर्थं षोडशपदार्थोपादानमित्याह प्रमाणादय इति प्रयोजनवशादिति प्रमा
णस्य प्रयोजनं तत्त्वनिर्णयः तत्र प्रमाणत्वेनैवोपयोगो न घटादिसाधारणेन द्रव्यत्वेनेन वायुरूपादिसाधारणगुणत्वादि

त्वसंबंधाऽयोगव्यवच्छेदः फलं दृश्यैवस्यादेरपि वक्तुं शक्यते न वैयर्थ्यादिति चेदुच्यते अत्र नवैवं त्वस्य
174 पृथिवीत्वादिरूपद्रव्यविभाजकोपाधिनवकान्यतमवत्त्वं द्रव्यलक्षणं तथा च सति नवप
दार्थस्य विशेषणतया तन्नवकान्यतमयोगाभाववत्त्वं नद्रव्यस्येति सुवर्णस्य द्रव्यस्य तद
न्यतमत्वे तन्नत्वं वत्वान्नद्रव्यस्य नवाधिक्यम एवकारस्य विशेषणसंगतत्वात् अयोगव्यवच्छेद
प्रतीतेः यथा शंखः पांडुर एवेत्यत्र नवपदार्थस्य विशेष्यत्वे नवभिन्नतमसि द्रव्यत्वयोगो नास्ती
ति नवभिन्नस्य तमसो द्रव्यत्वाभावः प्रतीयते विशेष्यसंगतत्वेवकारस्यान्ययोगव्यवच्छेदार्थकत्वा
त् पार्थ एव धनुर्धर इतिवत् अनन्तरं नवैव तस्मिन्नवातिरिक्तद्रव्यप्रतिषेध एव प्रयोजनं स च
सिद्धासिद्धिभ्यामनुपपन्नः सिद्धो प्रतिषेद्धुमशक्यत्वात् असिद्धो प्रतियोग्यप्रसिद्धेरभावानिरूप
णादिति निरस्तम एवं नवभिन्ने सिद्धे तेजोभावरूपतमसि॥ प्रसिद्धस्यैव द्रव्यत्वस्य प्रतिषेधात् पृ
थिवीं लक्षयति पृथिवीत्वेति गंधसमवायिकारणतावच्छेदकतया पृथिवीत्वं जातिः सिद्ध्यति
सुरभ्यसुरभिकपालारब्धघटस्यापि गंधस्वरूपयोग्यतया पृथिवीत्ववत्त्वात् प्रतिबंधकाभावरू
पसहकार्यभावेन फलाभावाभावात् परस्परप्रतिबंधेनावयविनि गंधानुत्पत्तिरिति एवं पाषा ८८

175 कारणत्वमर्थः विशिष्टनिरूपिताधिकरणताया अतिरिक्तत्वादित्युच्यते तथापि घटस्वरूपकार्य्यप्रति
योगिकत्वविशिष्टसमवायाधिकरणे घटरूपेऽतिव्याप्तिः यथा रूपसमवायवान्घटस्तत्र रूपप्रतियोगिक
समवायाधिकरणता घटस्य तथा घटसंबंधिरूपमित्यत्र घटप्रतियोगिताकसमवायाधिकरणता रूपस्य
किंतु स एव समवायो घटे रूपप्रतियोगिको वृत्तितानियामकः रूपे घटप्रतियोगिको वृत्तितानियामकः पृथ्वी
भूतले घटप्रतियोगिकः संयोगो वृत्तिनियामकः आकाशप्रतियोगिकस्तु न तथा वृत्तिनियामकत्वादेः
स्वरूपविशेषत्वात् तथा च कार्य्यनिरूपितसमवायेत्यत्र कार्य्यपदं स्वकार्य्यपरं तस्य चेत्संबंधित्वे सति कार्य
त्वमर्थस्तदा सर्वोक्त एव दोषः इति स्वनिष्ठकारणतानिरूपितकार्य्यताश्रयपरतया व्याख्या तथा च स्वनिष्ठ
कारणतानिरूपितकार्य्यताश्रयप्रतियोगिकत्वविशिष्टसमवायाधिकरणत्वरूपकार्य्यसमवायित्व
मिति स्वत्वघटितपरतया एतदवच्छेदकदर्शितेन लक्षणस्य च संबद्धत्वमिति बोध्यम् एतेन कार्य्यसमवायित्व
मेव लघु लक्षणमुचितं मूले तु कारणपदप्रवेशो गौरवाधायक एवेति व्याख्यानं मूलगं यथाभावाधिक
व बोधमूलकमिति विज्ञेयं की यम स्वव्याप्तिविभजते तानीति नवैवेति ननु संख्यानिधानस्य न्यूना
धिकसंख्याव्यवच्छेदः फलं तत्र ते न्यूनं भवति न चत्वे न्यूनाधायकत्वादिरूपापानवत्ताधिकाया
भावत्वरूपायाः संख्यायाः द्रव्ये सत्त्वात् संख्यामात्रस्य गुणत्वेन पाद्रव्यवृत्तित्वात् अतएव च न नव

मौ ८८

रणार्थः द्व्यणुकादिपक्षे अप्यर्थः तेन पार्थिवपरमाणूनां पाकजरूपादयः द्व्यणुकादीनां कारणगुण
176 पूर्वकाः पाकजोऽपीति भावः पाकपदार्थमाह पाकस्त्विति उष्णेत्यनभिभूतस्पर्शवत्तेजःसंयोग इत्यर्थः
तेन वह्निसूर्यादिसंयोगस्य सुवर्णादिसंयोगस्य वा न पाकत्वम् तेनेति पाकेनेत्यर्थः पृथिव्यामिति पूर्वो
क्तोद्भाविधायामित्यनुषज्यते नश्यतीत्यत्र तेनेति करणत्वेनान्वितम् जन्यत इत्यत्र कर्तृत्वेनेति
बोध्यं तथैवान्वयसंभवात् नश्यतेरिति पाठस्तु सुगमः जलं लक्षयति अप्स्विति अत्र जलत्वं न जन्य
जलप्रतिसमवायिकारणत्वात् जलसमवायिकारणतावच्छेदकतया जलत्वजातिसिद्धिः अथैवं
जलत्वस्य जलजन्यतावच्छेदकजलत्वजात्या सांकर्यं जनकतावच्छेदकजातेः परमाणौ जन्यता
वच्छेदकजातेः अन्त्यावयविनि परस्परात्यन्ताभावसमानाधिकरणत्वात् एकस्मिन् जलद्व्य
णुकादावुभयोः सत्वात् न च जलस्यान्त्यावयवि विनास्तीति वाच्यं अन्यजलस्यान्त्यावयवित्वाभावेपि
करकालोकीयशरीररसनेन्द्रिययोर्जलीययोरन्त्यावयवित्वात् मैवम् जनकतावच्छेदकजातेर्व्या
पकत्वात् शरीरादेरपि जलप्रतिस्वरूपयोग्यत्वात् सहकारिविरहादेव फलाभावोपपत्तेः संगत्या
द्व्यणुकसंयोगविशेषस्य समवायिकारणतावच्छेदकतयापि जलत्वजातिसिद्धिः घृतादिना सहका
दिसत्वेपि घृताद्युपष्टम्भकजलभागस्यैव हेतुत्वं अवान्तरभेदमाह रसनेन्द्रियेति रसनेन्द्रियल ८८

177 णोरपि पृथिवीत्वं बोध्यं तेषामपि द्रव्यत्वसमनियतं ध्या... गन्धवदवयवारब्धत्वनियमाभावात् किंत्ववयवानां सु
रभ्यसुरभिरूपविलक्षणगन्धवत्वात्स्वस्वप्रतिबन्धेनावयविनि गन्धानुत्पत्तिरिति पृथिवीति पृथिवीति स्वव
क्तव्या एवमग्रेपि लक्षणान्तरमाह काठिन्येति काठिन्यकोमलत्वादिरूपावयवसंयोगविशेषवत्त्वमित्यु
क्तेत्यर्थः आदिपदग्राह्यपरिग्रहः तत्र काठिन्यसंयोगः पाषाणावयवानाम् कोमलत्वसंयोगः पुष्पाद्यव
यवानाम् अत्र संयोगत्वं लक्षणावयवानां लक्षणे च काठिन्यसंयोगव्याप्तिवृत्ति द्रव्यत्वव्याप्यजातिमत्त्व
एव कोमलत्वसंयोगादिकमादाय बोध्यं तदवान्तरभेदानाह घ्राणेति घ्राणमिन्द्रियं शरीरम् [illegible] मनुष्य
लोके तद्द्विविधं योनिजमयोनिजं च स्त्रीपुंसंयोगजं योनिजं तदपि द्विविधं जरायुजमण्डजं च आद्यं गर्भो
द्भवम् तेन मनुष्यादिशरीरं द्वितीयं गर्भेण्डजं तद्भवम् पक्ष्यादिशरीरम् योनि... तद्भिन्नमयोनिजम् ना
रकादिशरीरं नारकीयशरीरं च धर्माधर्मविशेषजन्यं तस्याश्चतुर्दशगुणवत्त्वं दर्शयति रूपेति परमाणु
ले॰ रूपेति परमाणोरनित्यत्वे तस्यावयवान्तरकल्पने अनवस्थापत्तेरित्यर्थः कार्यरूपेति द्व्यणुकादिरूपा
नित्येत्यर्थः द्विविधान्यनित्यानामनित्यानां चेत्यर्थः परमाणुरूपादीनां पाकजतया द्व्यणुकादिरूपादीनां
कारणगुणपूर्वकत्वात् एकान्विता पाकजत्वानि निखिलपार्थिवरूपादीनामेवानित्यत्वम् न जलादिवत्प
रमाणुगतानां नित्यत्वमन्येषामनित्यत्वमिति भावः पाकजान्येवेति चकारेवकारः परमाणुपक्षे अवधार

गौ ८.

178 रूपेति नित्यमित्यादिः परमाणुरूपं नित्यं द्व्यणुकादिरूपमनित्यमित्यर्थः पुनरन्यथा चातुर्विध्यमाह उद्भूतेति उद्भू
तरूपस्पर्शोभयवत् अनुद्भूतरूपस्पर्शोभयवत् अनुद्भूतरूपोद्भूतस्पर्शवत् उद्भूतरूपानुद्भूतस्पर्शवदिति चा
तुर्विध्यम् तत्र प्रथममुदाहरति यथेति पिण्डितमिति पिण्डितं घनीभूतं विजातीयावयवसंवलितमित्यर्थः तेन सु
वर्णादिव्युदासः द्वितीयस्पर्शयोरभिभवनिरासः वन्ह्यादिकमित्यादिपदात्सौरतेजसः परिग्रहः उद्भूताभिभूतरूपस्प
र्शयस्य तेजः इदं केचिद्भिन्नं ते सिद्धान्तस्तु उद्भूताभिभूतरूपमनुद्भूतस्पर्शं तेजसमिति सुवर्णस्य तस्य स्पर्शो न प्रत
यक्षविषयत्वे तद्गुणो चिन्तामणिकारैः उद्भूतस्पर्शवत्त्वस्य बहिरिन्द्रियजन्यद्रव्यसाक्षात्कारप्रयोजकत्वे सुव
र्णप्रत्यक्षं न स्यादित्यभावे तस्यानुद्भूतस्पर्शवत्त्वादुद्भूतस्पर्शवत्त्वमेव किं तु पृष्ठम्भक पीतरूपाभिभूतमिति न
नु वल्लवत्सजातीयग्रहणकृतमग्रहणत्वमभिभवः तथा चान्धकारे पार्थिवभागस्य पीतरूपग्रहणाभावेन
सुवर्णस्य तैजसः मुक्त भास्वररूपाग्रहणप्रसक्तिरत आह अभिभवस्त्विति न चाव वल्लवत्सजातीयसंबंध
नेवाग्रहणं न तत तत्र इति भावः सर्वधर्मस्वसमवायिसंयुक्तसमवायसम्बन्धः पार्थिवेति पीतरूपस्य पा
र्थिवत्वनियमादिति भावः नन्वन्धकारे सुवर्णस्य चाक्षुषं स्यात् तेजो विषयके चाक्षुषे तेजोन्तरानपेक्षणादिति
चेन्नैव रूपाविषयकद्रव्यचाक्षुषाभावेन रूपवाक्षुषसामग्र्यामालोकपदस्य चाक्षुषहेतुत्वात् प्रकृते तेज
स्स्वरूपस्याभिभूतत्वात् पार्थिवरूपग्राहकस्यालोकस्याभावात् न च पार्थिवे चारुणापीतादिरूपेणाभिभू ८.

179 सत्यं पूर्वोक्तम् कारकादीत्यादि पदार्थलक्षणं लौकीयशरीरस्य परिग्रहः नतु करकायाः काठिन्यसंयो
गवत्वात्पार्थिवत्वमेवोचितम् नतु जलत्वं सांसिद्धिकद्रवत्वाभावादिति चेन्नैव अदृष्टवशात्पतित
करकात्वस्यैव जलत्वस्य करकात्वात् अतएव प्रतिबंधकापगमे पाकं विनापि द्रवत्वोपलंभः पार्थिवत्वे
घृतादिव तेजःसंयोगादेव नैमित्तिकद्रवत्वं स्यादिति काठिन्यसंयोगस्तु पूर्वपृष्टभक पार्थिवभागविशेषस्येवे
ति बोध्यम् अस्यापि वस्तुतः शुक्लगुणवत्वं दर्शयति गन्धवज्जमित्यादिना जलं दुर्गन्धमित्यादिप्रतीतिस्तु पार्थिवा
वयवसंयोगात्संयुक्तसमवायेन तुल्यादितः स्फटिके इत्यादि वस्तो पार्थिवीति भावः नित्यानामिति ज
लपरमाणूनामित्यर्थः नित्यत्वेत्यत्र कारणपार्थिवपरमाणुवत्पाकजानित्यरूपादिव्यवच्छेदः
अनित्यानाम जलद्व्यणुकादीनां अनित्यत्वेत्यत्र कारणे कारणवर्तीत्रोरूपाणादिव्यक्तयोनित्याः
कार्यकारण्यवृत्तयः इति तन्नव्यवच्छेदः तेजोलक्षयति तेजस्त्वमिति जन्यतेजस्त्वेन तेजस्त्वेन कार्यकारण
त्वे भावो जलत्ववत्तेजस्त्वादिजातिरूपनीया एवं वायुत्वमपि बोध्यम् अवान्तरभेदमाह वहुणिति विद्यु
दादीत्यादिपदात्सूर्यलोकीयतेजसश्चरीरस्य कांतादिमणिप्रभाजाठराग्निवडवाग्निप्रभृतीनां प
रिग्रहः सामान्यतश्चातुर्विध्यमाह दिव्यमिति दिव्यं तव्य विद्युदादिः भौमं पार्थिवेंधनवन्त्यादिः औद
र्यमाहारपाननतमोदरतेजः आकरजं स्वर्णादिप्रभेदमणिप्रभासुवर्णादिः एकादशगुणवत्वेदर्शयति

मौ ८१
180 नैनु द्रवत्वं पीतद्रव्यस्यैव पीतं द्रुतमिति प्रत्ययात् अन्यस्यापीतस्य द्रुतत्वे जलमध्यस्थितपीतवस्त्रादिभूत
पृथगनुपलब्धिः स्यादिति चेन्न रूपाभावेन द्रवद्रव्यसंबंधस्यावरूपकत्वेन तादृशप्रतीतेर्भ्रमत्वात् मसीतो
पमध्यस्थितकुंकुमवर्णपार्थिवावयवानां द्रवत्वाभावेपि द्रवद्रव्यसंयोगात् पृथिवीजलसंयोगवन्न पा
त्ल ४ पृथगनुपलब्धिवत्पीतद्रव्यस्य पृथगनुपलब्धिवत्पीतद्रव्यस्य पृथगनुपलब्धेरुपपत्तेः अथवा पार्थिवभागेपि
द्रवत्वमुत्पन्नमेव किंतु तत्स्पद्रवद्रव्यसंबंधान्तोच्छेदः यथा क्वथ्यमानजलमध्यस्थघृतादिवत्तस्मिन्स्थले वह्निनाशसंबंधि
र्वैनैमित्तिकद्रवत्वे वह्नेः संजातद्रवत्वे वा चक्षुषानुद्भूतत्वादुद्भूतरूपवत्त्वमिति केचित् तन्न उद्भूतरूपवत्त्वस्य द्रव्य
समवेतस्यैव चाक्षुषत्वात् उद्भूतरूपस्यापीतरूपेणाभिभवान्न चाक्षुषप्रत्यक्षं रूपस्य तस्य उद्भूतत्वे प्रमाणा
भावेनानुद्भूतत्वमेवेति बोध्यम् पूर्वोक्तचतुर्विधतेजसां स्थितीयमुदाहरति यथा वह्नेरिति वह्नेरुक्तेजोरूपस्य
मुक्ताभास्वररूपमुष्णस्पर्शश्चोभयमप्युद्भूतमित्यर्थः द्वितीयमुदाहरति यथा तप्तवारीति तप्तवारिस्थ
तेजस उद्भूतरूपाभावान्न प्रत्यक्षं वायुवत् उद्भूतोष्णस्पर्शस्यैव स्पार्शनं नैयायिकानां मते मीमांसकानां
मते तु वायुवद्वह्न्यादिस्पार्शनाविषयता तेजसोविद्यते इति बोध्यम् तत्र वायुवदेव स्पर्शनं तृतीयमुदाहरति
यथा प्रदीपेति प्रभायाउद्भूतरूपवत्त्वाच्चाक्षुषप्रत्यक्षत्वं अनुद्भूतस्पर्शवत्त्वान्न स्पार्शनप्रत्यक्षत्वमपि घटे ८१
इति भावः वायुत्वव्याप्ति वायुत्वेति प्रागुक्ता युक्तिः अवान्तरभेदमाह त्वगिन्द्रियेति त्वगिन्द्रियं पूर्वमुक्त

181 तमपि वह्निरूपं स्वपरप्रकाशं छादयति तथाभिभूतमपि शुक्लरूपं स्वपरप्रकाशं भवेदिति वाच्यम् तत्र शुक्ल-
त्वमेवारूपेणादिनाभिभूतं ननु भास्वरत्वमत्र तु पीतरूपेण भास्वरत्वमप्यभिभूतमिति कल्पने फलवत्वात्
अतोऽभिभूतरूपवती वह्निप्रभैवात्र प्रकाशिका ननु पीतरूपाधिकरणत्वे कठिनत्वगुरुत्वादिना स्फु-
वर्णस्य पार्थिवत्वमेवोचितं ननु तेजस्त्वमिति चेन्नैवम् पीतरूपाधिकरणस्य पार्थिवत्वमेव तस्य चोत्प-
तानलसंयोगे सति द्रावाभावदर्शनेन द्रवद्रव्यसंबंधोऽनुमीयते यथा स्वेतानलसंयुक्तं पीतं वस्तु द्रव-
द्रव्यसंबद्धं चिरकालानलसंयोगेऽप्यदाह्यपार्थिवत्वात् चिरकालानलसंयुक्तजलमध्यस्थितपीत-
पटवदित्यनुमानेन पार्थिवभागसंबद्धद्रवद्रव्यसिद्धेस्तद्द्रव्यं रूपवत् द्रवत्वादिति रूपेणानुमिते न
तु छायावद्रूपवत्वात् ननु तत्र सांसिद्धिकद्रवत्वाभावान्नैमित्तिकद्रवत्वाद्वा न पार्थिवदाहप्रति-
बंधकद्रवत्ववत्वात् यत्पार्थिवेतरदाहप्रतिबंधकद्रवत्ववत् यथा घृतलोहादिकमिति व्यतिरे-
केदृष्टांतः पार्थिवद्रवत्वस्य दाहप्रतिबंधकत्वे घृतादेरपि तथात्वापत्तेः एवं क्रमेणेतरद्रव्यबाधात्ते-
जोरूपमेव द्रवद्रव्यमिति चेत् न चेत् तस्य द्रवद्रव्यस्य प्रतिबंधकत्वे जलमध्यस्थितस्येव द्रवत्वे सुवर्णमध्य-
स्थितस्य घृतादेर्दाहेन स्यादिति वाच्यम् फलबलेन स्वोपष्टंभकद्रवमात्रदाहप्रतिबंधकत्वकल्पनात्

गौ०९२ प्रतिस्पर्शस्य हेतुत्वमित्यधिककार्य्यकारणभावकल्पनापत्तेः अन्यथाकाशादेरपि स्पार्शनं स्यात् वायुस्पर्शो यानु
182 द्भूतत्वाभाववत्त्वापि स्पार्शनहेतुताकल्पनीया अन्यथा त्वगिंद्रियादेः स्पार्शनतापत्तेः तथा द्रव्यत्वावच्छिन्नं मूर्त्त
वोद्भूतरूपवत्त्वे वा रूपकार्य्यतावच्छेदकम द्रव्यस्पार्शनत्वं मूर्त्तस्पार्शनत्वं वा स्पर्शकार्य्यतावच्छेदकमिति विभिन्नमेव
नाविरहात्कार्य्यकारणभावद्वयस्यापत्तिरिति महागौरवम् तस्मात्स्पार्शनविषयकजन्यप्रत्यक्षत्वे वोद्भूतस्पर्शत्वापेक्ष
णगुर्व्विति कार्य्यतावच्छेदकं कल्प्यते अतो रूपाभावाद्वायोरप्रत्यक्षता न तु यदि द्रव्यस्पार्शनं प्रति स्पर्शस्य हेतुता
नांगीक्रियते तदा प्रभाया अपि स्पार्शनं स्यादिति वेन्न घटाकाशसंयोगादेः स्पार्शनवारणाय स्पार्शनं प्रति
स्पार्शनाभावस्य सामानाधिकरण्येन प्रतिबंधकता तत्र च त्रसरेणोरस्पार्शनत्वेपि तत्समवेतचतुरणुकादीनां स्पा
र्शनविषयत्वादेतत्स्पर्शवदन्यत्वेति प्रतिबध्यतावच्छेदकं विशेषणीयं तेनोद्भूतस्पर्शवदन्यसद्विषयकस्पार्श
नत्वं प्रतिबध्यतावच्छेदकमिति प्रभास्पार्शनस्यापि तदाक्रान्ततया प्रभावयवेषु स्पार्शनविषयत्वाभाववद्रूपप्र
तिबंधकसत्त्वादेव प्रभायाः स्पार्शनविषयत्वाभावोपपत्तेः आकाशादौ स्पार्शनाभावस्य शने व्यभिचारवार
णाय सद्विति विशेषणीयम् स्पार्शनं प्रति त्रसरेणोस्तन्वेनैव प्रतिबंधकता मेयवादिसिद्धा नन्वेवं स्पर्शस्पा
र्शने व्यभिचारः वायोरस्पार्शनत्वेपि तत्स्पर्शस्पार्शनसंभवदभिमतत्वात् स्पर्शग्रहत्वेनापि विशेषणे घ्रा
णेंद्रियस्पर्शस्पार्शनं स्यात् वायवीयस्पर्शोन्य इति विशेषणे त्वगिंद्रियस्पर्शस्य तत्स्यापत्तिरिति वेन्नैवमुद्भूतस्पर्श ९२

प्राणः शरीराभ्यन्तरसंचारी वायुः वातो वहिःस्थितो वायुः वृक्षादीनां कंपनकारी आदिपदाद्वायुलोकेवि
183 ग्रहणादीनां शरीरपरिग्रहः अस्य गुणानां नवत्वं दर्शयति स्पर्शेति वायोरतींद्रियत्वात्तत्रानुमानं दर्श
यति सर्वेति प्रयोगस्त्वेति वा मरव्यजनादिसंचलनानंतरमनुभूयमानोऽनुष्णाशीतस्पर्शः द्रव्याश्रितो
एवं क्रमेण नानावक्तृकत्वमिति भावः नानाकादिकृतानुवादेऽतिव्याप्तिवारणाय प्रतिपादके इति यदुपिदूकोदीरितवाक्य प्रतिपा
दकं भवत्येव तथापि वादिप्रतिवादिनोर्दूष्यतया प्रतिपत्तिजनकत्वमर्थः शुकाद्युदीरिते दूष्यत्वेनुच्छेरभावात् पूर्वपक्षत्वेके वाक्ये
स्वाभ्यपक्षकत्वाभावात् संभवतीति संदर्भपदं तादृशवाक्यानां संदर्भ उक्तस्य समूह इति यावत् तथा च समूहस्याभयपक्षकत्वेवि
द्यतए वेति भावः समूहस्य यावतां कथा विश्रान्तेति स्वावच्छिन्नकः समुदायः तेन नैकदेशेऽतिव्याप्तिः हेत्वाभासदर्शनलक्षणानि
उक्तान्यमिति अनुमानप्रकरणे इति शेषः आदिपदात् विपक्षासत्त्वप्रभृतीनां संग्रहः एकेनापीति यद्यप्येकेनापि रूपेण हीनाः केवला
न्वयिप्रभृतयः सद्धेतवएव उक्ता तथापि यस्य हेतोर्यावन्ति रूपाणि गमकतौपयुक्तानि तस्य तावदन्यतमेनापि किंचिद्रूपेण न्यूनत्वे सति
प्रेते केवलान्वयिसाध्यकस्य विपक्षावृत्तित्वे केवलव्यतिरेकिसाध्यकस्य च सपक्षसत्त्वे न गमकतोपयुक्तमित्युक्तं प्राक् तथा
च प्रकृतपक्षकप्रकृतसाध्यकप्रकृतहेतुकानुमित्युपयोगि पक्षधर्मत्वादिरूपपञ्चकान्यतमत्वे हेत्वाभासत्वे केवलो
न्वयिसाध्यकेऽतिव्याप्तिवारणाय अनुमित्युपयोगीति विपक्षावृत्तित्वस्याप्यनुमित्यन्तरोपयोगित्वात्तद्दोषवारणाय प्रकृ ५४०
तपक्षादिप्रकृतानुमितिपदलाभः उपयोगित्वं च रूपाणामनुमितिजनकहेतुतावच्छेदकप्रकारतया ज्ञानविषयत्वे बाधितत्वादिरूपे

278 दर्शयति सचेति अनिष्टास्तत्वज्ञानविरोधिनो ये निग्रहास्तेषामधिकरणं तु उद्भावनयोग्यस्तर्थः अनिष्टेत्यत्राक्षे
पविक्षेपविस्तारः तथा च न्यूनाधिकत्वादिरूपनिग्रहस्थानोद्भावनं वादेऽपि विधीयते अन्यथा तत्वनिर्णयासंभवात् परं तु
न तत्र जयपराजयौ न स्त इति भावः न्यूनेष्टनिग्रहस्थानानां निदर्शयति नेवेति न्यूनाधिकापसिद्धान्तान्तस्य पंच हेत्वाभा
साश्च पंचेति निग्रहस्थानानीत्यर्थः इदं [illegible] मुपलक्षणं पुनरुक्तत्वादिकमपि वादे उद्भावनीयमिति एषां लक्षण
मग्रे दर्शनीयानि जल्पं लक्षयति उभयेति परपक्षनिराकरणपूर्वकस्वपक्षसाधनवतीत्यर्थः इदं च विशेषणं वितंडाति
व्याप्तिवारणाय वादे अतिव्याप्तिवारणाय विजिगीषुपदं सतिसंभवे सर्वनिग्रहस्थानमत्रोद्भाव्यमिति दर्शयति सर्वे
ति परपक्षदूषणोत्तरमेव स्वपक्षस्थापनमित्याह परपक्ष इति अस्य च फलं विजयः अत्र केवलं स्वपक्षस्थापने परपक्ष
दूषणे वा न विजयः किंतूभयसत्वे इति बोध्यं वितंडां लक्षयति स्वपक्ष इति अत्रापि विजिगीषुकर्तृकत्वमुक्तं तेन जल्पा
तिव्याप्तिवारणाय परीनांते स्वपक्षस्थापनं विना परपक्षदूषणोद्भावनादि नात तत्वनिर्णयफलिकायां वीतरागकथायामति
व्याप्तिवारणाय विजिगीषुपदं अत्र परपक्षदूषणेनैव विजयो न तु जल्पवत् स्वपक्षस्थापनमपीति दर्शयति परपक्षदूषणे
ति स्वपक्षस्थापनाभावे हेतुमाह नास्येति वैतंडिकेनापि एकसिद्धान्तमतमवलंब्यैव कथा कार्या अन्यथा शब्दस्यानित्य
त्वे साध्ये कृतकत्वहेतौ मीमांसामतमादृत्य वैतंडिके नासिद्धत्वोद्भावने नैयायिकेन तत्साधने पुनः सौगतमते न सिद्धसाधन
मुद्भावयन् वैतंडिकोऽभिमानी न पराजीयेत इति अत्र नास्तिकादिमतनिराकरणद्वारा तत्वनिर्णयस्तदर्थं जल्पवितंडे का

ऽऽ किस्म २

णाध्यविशेषणं केचित्तु तदभाववत्तद्विषयीभूतव्याप्तिपक्षधर्मताभावः इति वदंति असिद्धस्यासंकीर्णोदाहरणं व्याप्त्यसिद्धि
सत्वेऽवश्यं विरोधादिसंभवादिति तथा च तत्तद्दोषैरेव तत्तो दुष्टतासंभवे किमसिद्धेर्दूषणत्वेनेति मनसि कृत्वा शंकते यद्य
पीति संकीर्णदोषांतरसामानाधिकरण्येनासिद्धिर्विरुद्धादीनामेकः इत्यर्थः अत्रोपाधेयस्यासिद्धिविरुद्धादेरुभयरूपत्वेपि अ
२४ सिद्धविरुद्धत्वाद्युपाधीनां सांनस्यानुमितिविरोधितया पृथग्दूषणत्वे कथं स्यात् किं नो पंचकत्वे पातकानां चैकस्य वधादेनापि
न्नत्वेन वदितव्यमित्यभिप्रायवानाह यद्यपीत्यसांकर्यमिति उच्यते तज्ज्ञाप्यत इत्यर्थः हेतोर्नानादुष्टरूपत्वे विषयासांकर्यं न भवति
नानादोषवत्त्वेन प्रत्ययो न भवति तथा उज्ञाप्यते एकदोषोद्भावनेपि वक्तव्यता तेनैकस्य पर्यवसानासिद्धिरिति भावः तथा दे
भिन्नानादोषवत्त्वे एकस्यैकस्योद्भावनं कार्यमित्यत्र विनिगमकमाह योत्रेति पुरतः प्रथमतः परिस्फुरति उपस्थितो भ
वति दुष्टविशेषो दुष्टतया ज्ञाप्यत्वेऽयं साधकेतानुमाने समर्थो व्याप्तिपक्षधर्मताशाली स एवोद्भावनीय इति होषः दुष्टवि
ज्ञप्तौ समर्थ इत्यस्य व्याख्यानं दुष्टवित्तज्ञप्तिकारक इति हेषपदेति दूषणं प्रसाधकसाधकत्वासाधकमित्यर्थः एवं चेत्सर्वकारण
व बहुत्वमाह नान्यमिति कुतः इत्यपेक्षायामाह तेनैवेति तदुपजीवि न इति तदुपपन्नस्येत्यर्थः तदुपयोगित्वमिति कादेवप्रयोजनमेवार्थः
अनुपयोगादिति अथ हि येन निगृहीतो विवादः विरोधः कदाचिदप्यसंभव इति दर्शयति तथा च सतीति विरोधस्य स्याद्विवले विप
र्ययेति विपर्ययः साध्याभाववद्व्याप्यो विरोध इत्यर्थः अनैकांतिकत्वादीनामुद्भावनसमये दर्शयति एवमिति विरुद्धो
विपर्ययव्याप्त इति पाठे तादात्म्यसंबंधेन हेतुतया साधकतानुमापकत्वे दुष्टज्ञप्तिकारकत्वेबोधं तथाभूतो [illegible]
दुष्टत्वादि [illegible] पार्थः [illegible] तथा विद्विशिष्टो देयति यस्येति आत्मव्यभिचारितावच्छेदकविशिष्टो नाव्याप्यतावच्छेदकतावच्छेदकवै २४१
शिष्ट्या [illegible] तपावयस्य व्यभिचारितावच्छेदकाभावस्य [illegible] सिद्ध इत्यर्थः [illegible] मेति [illegible] देशानी

णादेतोर्लिङ्गस्यानुमितिकरणत्वात् अन्यथा निगमनावयवप्रयोगवैयर्थ्यात् अबाधितत्वज्ञानार्थमेव तत्प्रयोगः ता
280 दृशरूपैकैकदेशपक्षसत्त्वादिवारणाय रूपेति पक्षसत्त्वाद्येकैकोपादाने पक्षसपक्षवृत्तिव्यभिचारिण्यतिव्याप्तिरित
त्यत उक्तं पदं तथा चासिद्धः पक्षसत्त्वाभावः व्यभिचारिणि विपक्षासत्त्वाभावः एवं विरुद्धेपि एवं बाधसत्प्रतिपक्षस्थले
योः विरूपद्वयाभाव ऊह्यः अन्यतमत्वं च यावद्भिन्नो भेदोऽखंडः इति न वैयर्थ्यशंका अत्रानुमितिजनकीभूतहेतु
तन्मात्रम प्रमासाभावत्वे तेन बाधसत्प्रतिपक्षयोरित्यादौ प्रकृतानुमितिहेतुतत्पाविषयस्य साध्याभाववत्तिहेतोरवृत्ति
त्वस्यासत्त्वेपि नेदं नितिरितिवात्कटु बोधितया विरम्यते अहेतवइति अप्रमापकाः स्युः इत्थं चात्र घटादेरपि ल
क्षणत्वमेव हेत्वाभासपदव्युत्पत्तिं दर्शयति तेपञ्चेति कतिपयेति पक्षोपि पर्वतो वह्निमान् रूपत्वादित्यत्र रूपत्वस्य ज
लत्वादिना सत्प्रतिपक्षितस्य बाधितस्य पक्षसपक्षासत्त्वे विपक्षवृत्तेर्हेत्वाभासस्यानेकाप्रपि रूपं विद्यते तथापि हेत्व
दृश्प विषयवत्प्रतिपाद्यत्वाच्छिङ्कसौ[illegible]मत्त्वरीतिनासंगतिः तथा च हेतुरूपेत्यत्र रूपपदं साधर्म्यपरं न तु पक्षसत्त्वादिपंचरूपपरमिति
बोध्यं अनेन योगार्थकथनेनेदुष्टा हेतवो हेत्वाभासा इति रूढिरिति हेतोराभासा हेत्वाभासा इति व्युत्पत्त्या तु हेतुदोषा व्यभिचार
दयएव हेत्वाभासाः तदुक्तो हेतुदुष्ट इति बोध्यं तदवान्तरभेदानुदर्शयति तेचासिद्धेति असिद्धं लक्षयति सामान्येति उदय
नेनेति उक्तमित्यगतनेनान्वेति असिद्धलक्षणमिति ननु तावता विषयतयापरामर्शाभाववत्त्वमसिद्धत्वमित्या
गतं इदं च सद्धेतावपि परामर्शाभाववदशायामतिव्याप्तमिति चेन्न तदभावस्य तस्याः सिद्धेरभावो यस्मादिति व्यु
त्पत्त्या व्याप्तिविशिष्टपक्षधर्मताज्ञानप्रतिबंधकतानिरूपितविषयत्वे सति व्यभिचारभिन्नत्वमसिद्धत्वे असिद्धिमान् यो
हेतुः सोसिद्धः व्याप्यभावताने पक्षधर्मताभाववत्ताने वासति परामर्शादिदर्शनात् बाधादिवारणाय सत्यंतं व्यभिचारवार

गौ. त्तित्वाभावो विवक्षितः एव घटवृत्तित्वेपि तस्य पक्षत्वाभावादित्याभिप्रायः पर्वतो न साध्यते मैवमिति स्वरूपेण घटत्वादिमत्तया ज्ञापि
१५२ पः पक्षेऽस्त्यर्थः अनुमानेष्विति करणमनुमानमाहेतोरित्यर्थः संदिग्धत्वेनेति साध्यवत्त्वतदभावकोटिकसंशयविषयत्वे
नेत्यर्थः संदिग्धधर्मवानिति पाठे धर्मः साध्यं तद्वत्पक्षेतरणं सिसाधयिषाविरहविशिष्टसिद्ध्यभाववत्त्वेनाभिप्रेतं तत्र सा
281 धकमाह नानुपलब्ध इति व्याख्यातं प्राक् घटे पक्षत्वाभावमुपपादयति न चेत्यादिना अहेतुरिति असाधकः इत्यर्थः घटे
अनित्यत्वानुमितिर्जायतामित्यादिसिषाधयिषासत्त्वेनुपपन्नतासत्त्वादित्यस्यापि दृष्टान्तविशेषे सद्धेतुत्वमिति शेषः पक्षस्व
रूपासिद्धिप्रसञ्जकत्वेनेति स्वरूपेति आश्रये ... ति पक्षे इत्यर्थः स्वरूपमर्थो वृत्तित्वं पक्षवृत्तित्वं बाध्यते पक्षवृत्तित्वाभा
ववानित्यर्थः [illegible] योजयति कृतकत्वमिति सामान्यस्य प्रागभावप्रतियोगिताकृतकत्वस्य कार्यत्वरूप
स्यादेतोस्तत्र वृत्तित्वाभावादिति भावः भागासिद्धस्य स्वरूपासिद्धमध्ये न प्रविष्टं दर्शयति भागासिद्धोपीति हेतोः किंचित्पक्ष
वृत्तित्वे सति किंचित्पक्षावृत्तित्वं भागासिद्धत्वं एतदेव दर्शयति पक्षीकृतेष्वित्यादि भागासिद्धपदस्यार्थमाह अत एवेति भा
गे पक्षैकदेशे स्वरूपासिद्धत्वं वृत्तित्वाभावः इत्यर्थः एवं हेतुविशेषणासिद्धमप्यत्रैवान्तर्भावं दर्शयति तथेति कर्म
णोऽत्रास्तीति नन्वित्यादिना विशेषणविशिष्टस्य हेतोः पक्षवृत्तित्वाभावो विशेषणासिद्धः द्रव्यत्वे सति गुणादौ व्यभिचारवार
णार्थमुपात्तं असिद्धिं योजयति अत्र हीत्यादिना विशेष्यवत्त्वेपि विशेषणाभावकृतो विशिष्टाभाव इति दर्शयति न चेत्यादिना
प्रदर्शितमिदमभावत्रयं ते न द्वेषस्य स्थलीयत्वेन नान्वयः अत हेतुविशेषणेति दृष्टान्तेन दृढयति यथा दण्डमात्रेति भावेप
दात्सु हस्तस्य सत्वेपीति लभ्यते अभावस्य तरमनुभूयत इति शेषः विशेष्येति विशेषणस्य पक्षे वृत्तित्वे सति विशेष्य
स्यतद्वृत्तित्वाभावो विशेष्यासिद्धिः तद्धेत्वविशेष्यासिद्धः अत्र च विशेष्याभावकृतो विशिष्टाभाव इति दर्शयति न चेति १५२

282 पुरःस्फूर्त्तिकाद् इत्यर्थः अनैकान्तिकादय इति तत्रोद्भावनीया इति शेषः व्याप्तीति व्याप्तिपक्षधर्मताविशिष्टं यद्धेतुस्वरूपं 123
तदुक्तस्य भावेन तद्विषयकज्ञानविषयाभावेन व्याप्तिपक्षधर्मतान्यतराभावेनेत्यर्थः पूर्वोक्ता इति पुरःस्फूर्त्तिका इत्यर्थः
यत्रैव व्याहृत्यं तथा चैते असिद्धापि त्र व्याप्तिपक्षधर्मताभाववत्त्वा पुरःस्फूर्त्तिकास्तत्रोद्भावनीया इत्यर्थः असिद्धादय इति
पाठे असिद्धपदेन त्रिविधासिद्धमध्ये एकस्य ग्रहणं आदिपदेन चेतरयोरिति बोध्यं दृष्टान्तसिद्धेत्यस्यादौ न एवेत्यध्याहारः तेषु
दृष्टान्तसिद्धिकारकहेत्वोरसाधकतानुमापकाः इति पाठविहितास्ति वचस्येव सान्त्वमित्यर्थः यद्वा पूर्वोक्ता इत्यस्य विवरणं दृष्टान्तसि
ति असिद्ध इत्यस्य विवरणं दृष्टान्तेति किञ्चित्तु असिद्धस्यावान्तरभेदानाह तथाभूता इति दृष्टान्तसिद्धिकारका इत्यर्थः आश्रया
सिद्धं लक्षयति पक्षस्येति आश्रयः पक्षतावच्छेदकविशिष्टो भावः गगनपुत्रे पक्षतावच्छेदकवैशिष्ट्याभावेऽज्ञापितत्वाद् इत्यर्थः तथा स्वरूप
सपक्षे पक्षतावच्छेदकाभावः स आश्रयासिद्ध इत्यर्थः उदाहरति गगनेति अत्र पक्षे गगनारविन्दे पक्षतावच्छेदकस्य गगनीय
त्वस्याभावः सरोजेति सरोवरजन्यस्य इत्यर्थः तेन न पौनरुक्त्यं अत्रेति गगनारविन्दे गगनीयत्वप्रकारकभ्रमविषयताविरहस्य मा
पक्षः स च पक्षो नास्त्येव पक्षतावच्छेदकविशिष्टो न भवत्येवेत्यर्थः अन्यथालीकत्वमिति योगिकाभावस्यालीकत्वनिषेधा
नुपपत्तेः सिद्धसाधनस्यालीकत्वमेव हेत्वाभास इति हेत्वाभासतालीके धर्मिस्वरूपं दर्शयितुमुदाहरणान्तरमाह अथ पक्षसिद्धि
दृश्यते अनित्यत्वे ध्वंसप्रतियोगित्वपक्षे घटे पक्षतावच्छेदकस्य घटत्वस्य सत्त्वान्नाश्रयासिद्धिः इति मन्त्वाशंकते नन्वि
ति आश्रयस्य पक्षतावच्छेदकविशिष्टस्य सत्त्वादित्यर्थः ननु तथा सत्यत्र हेत्वाभासान्तराभावात् कः हेतुदोष इत्यत आह
सिद्धेति सिद्धस्य निश्चितस्य साध्यस्य साधनं यस्मात् हेतोः स सिद्धसाधन इत्यर्थः तथा च नत्रासिद्धिरूपप्रतिबंधकसत्त्वान्नानुमि
तिरिति भावः तदेव दर्शयति सिद्धस्येति अत्र साध्यनिश्चयसत्त्वे घटस्य पक्षत्वाभावात् पक्षतावच्छेदकस्य पक्षत्ववैशिष्ट्यस्य
दत्याभासान्तरत्वरूपमस्येति दर्शयितुं वा पा ५

तो॰ १८३ दुरत्वादिविशेष्यत्वविशिष्ट गुणत्वाभावो वोध्य इत्यभिप्रायः व्याप्यत्वासिद्धं लक्षयति व्याप्यत्वेत्यादिना पक्षेति पक्षमवच्छि
१ न्नेत्यर्थः तेन ह्रदत्वस्य त्वाहित्यादेर्नाव्याप्तिः अन्यथा गुणकर्मान्यत्वविशिष्टसत्तापाद्व्यत्व व्याप्यतया विशिष्टसत्तापात्र
283 केवलसत्तानतिरेकाद् व्याप्तिः स्यात् व्याप्तिरिति साध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्तिरित्यर्थः तेन कांचनमयवह्नि
मानुधूमादित्यादेः सुवर्णमयवह्निव्याप्यत्वे पि हेतौ न व्याप्तिः तथा च साध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्यतानवच्छेदकधर्म
वच्छिन्नो व्याप्यत्वासिद्ध इति पर्यवसितं तद्विभागमाह स द्विविध इति साध्येनेति असहचरितोऽसमानाधिकरणः एतेना
नौपाधिकसंबंधरूपा व्याप्तिः सामानाधिकरण्यरूपविशेषव्याप्ति विरहाद्विशिष्टाभावो दर्शितः सोपाधिक इति उपाधिना सह
वर्तत इति सोपाधिकः सोपाधिकस्य साध्यसंबंधः साध्येन सह सामानाधिकरण्यमित्यर्थः अत्राप्यनौपाधिकत्वरूपविशेषणाभा
वकृतो विशिष्टव्याप्यभाव इति वोध्यं पक्षादिरिति वौद्धमते यवपवप्रयोगे यथा घन इति तन्मते असाध्यसाधकोदृष्टांतं अन्यथा
घनस्यापि क्षणिकत्वासिद्धेर् दृष्टान्तत्वानुपपत्तेः क्षणिकत्वं साध्यमिति नैयायिकमते एतस्यासिद्धिरुक्तरमया ह्रदो वोध्यः सत्वे हेतुरि
ति अत्र हेतुतावच्छेदकं पक्षसत्वेत्वं तत्साध्यनिरूपितव्याप्त्यनवच्छेदकमिति भवति व्याप्यत्वासिद्धिः अत्र साध्यासहचरित इत्यस्य
साध्यानधिकरणवृत्तित्वमर्थ इत्यभिप्रेत्य उदाहरति यदि वे साध्याधिकरणावृत्तित्वमर्थः तदा वह्निमान् ह्रदत्वादित्यादिकमु
दाहर्त्तव्यं एषां मते चरमशब्दस्य उपदर्शनाय नाशनाशपतया नैयायिकत्वे तन्मते गगनकमलवादिनः साध्यत्वे साध्यप्रसिद्धे
रेवोदाहरणमिदं निष्कर्षस्तु शब्दगंधेत्युक्तिः साध्याप्रसिद्धिदोषस्तु पक्षतावि घटकत्वात् अप्रसिद्धिमध्ये तत्र भूतः
पक्षोगोवर्द्धनेनोक्तं एतस्य द्वितीयत्वे क्षणिकत्वप्रसिद्धोक्तमप्रसहचारः अप्रसिद्धेत्वपार्थक्यं तैवेतिवन्न अस्यावतरणे उदाहरणं
तद्रूपलक्षकत्वाद्द्धिति तद्रूपकारिपभावानवबोधमूलं न त्वेवमिति क्षणिकत्वनिरूपितव्याप्तेरेतच्चतुसंबंधिते प्रमाणे १८३

284 विशेष्येति स्वरूपमस्त्वित्यनेनेतरमत इत्यनुषंगः असमर्थेति व्यभिचारावारकविशेषणवान्हेतुरसमर्थविशेषणः समर्थविशेष
णइत्यर्थः सामर्थ्यमिति व्यभिचारवारकतालक्षणमिति शेषः अकारणत्वस्येति अकारणकभावत्वस्येत्यर्थः अन्यथा प्रागभावे व्यभि
चारवारकत्वेन समर्थविशेषणत्वात् प्रागभावाप्रतियोगित्वरूपं वा नित्यत्वं साध्यं वह्निमान् धूमे पुर्वमत्वादित्यादिकमस्त्येव हेत्व
वो ध्वंसत्वरूपमिति द्रव्यतानुघटयति स्वरूपेति विशेषणाभावस्य पक्षवृत्तित्वाभावं मत्वा शंकते नन्विति गुणत्वस्य पक्षे सत्त्वेपि तद्विशे
षणीभूतविशेषणत्वविरहात् विशेष्यगुणत्वविशिष्टगुणत्वाभावो वर्त्तत एव पक्षे इत्यभिप्रायवान् समाधत्ते सत्तामिति कृतीनत
द्विशेषणमित्याशंकायामाह तदेवेति तत्र मतिहेतोरसमस्य व्याप्यभिन्नस्य च्छेदेन व्यावृत्त्या प्रयोजनवदित्यर्थः अत्र भेदेत
वत्र तीयाधाम्येन धनं वा नितिं तिनयावावाप्यं रविते तस्य प्रयोजनवत्त्वमभिचारवारकमेव विशेषणमिति भावः इदं चैकदेशिमते ध्या
मास्तिस्येवोक्तं वस्तुतस्तु समर्थविशेषणासमर्थविशेष्ययोर्व्याप्यत्वासिद्धिमध्येतभावः वस्तुमात्रतत्वस्य लक्षणयोगस्तु वि
शिष्टस्य पक्षवृत्तितया प्रकृते लक्षणयोगात् समर्थविशेषणादेर्व्याप्यत्वासिद्धत्वे नैव तांत्रिकाणां व्यवहारस्तु समर्थविशेष्यल
क्षयति असमर्थत्यादिना साध्याभिचारिविशेषणवान् हेतुरसमर्थविशेष्यः लक्षणस्यु [illegible] ीकरोति अत्रेत्यादिना विशे
षणमकरणकत्वे तन्मात्रस्येत्यर्थः विशेष्यवारणाय मात्रपदं सामस्त्ये चकारः संपातायातो निरर्थकः अथवा विशेष्यम
समर्थमेवेत्यग्रिमेण योजनीयं समर्थत्वादिति व्याप्तिपक्षधर्मता रूपसामर्थ्यवत्वादित्यर्थः नन्वकारणत्वविशिष्टगुणत्वस्य
हेतोः पक्षवृत्तित्वोस्त्वरूपासिद्धता कथमस्येत्यत आह स्वरूपेति विशेष्याभावइति न तु विशेष्याभावएव कथं विशेष्यस्य गु
णत्वस्यतेत्राह स्वरूपाभावेन प्रकृते विशेष्यत्वाभावात् तथा च गुणस्य गुणत्वस्य पक्षवृत्तित्वेपि विशेष्यत्वविशिष्टगुणत्वाभावः प
क्षे विद्यत एवेत्यभिप्रायवान् तदेव मननास्तिनि धापाह शेषं पूर्वं वदति पूर्वं यथा विशेषणत्वविशिष्टगुणत्वाभावः पक्षे दर्शितस्त
था रूपपक्षेवृत्तित्वादिति चेन्मैवं हेतौ व्यभिचारवार [illegible] कस्यैव प्रकृते विशेष्यत्वान्न गुणत्वस्य ॥२२

५४

285

गो०५४ ध्याभावव्याप्यरूपत्वार्थः साध्याधिकरणावृत्तित्वं विरुद्धत्वमिति तु लक्षणं तेन न सत्प्रतिपक्षो ऽद्रव्यत्वादित्यादेः साध्याभावव्या
प्यत्वेपि ऽव्याप्यत्वस्य नातिव्याप्तिः लक्षणं लक्ष्ये योजयति अत्र हीति अथानैकान्तिकं लक्षयति साध्यसंशयेति साध्यसंदे
हजनकीभूतज्ञानविषयरूपत्वार्थः भवति हि साधारणधर्मवद्धर्मिज्ञानात् साधारणधर्मवद्धर्मिज्ञानात् संशय इति
तद्विषयत्वं साधारणासाधारणरूपस्यानैकान्तिकस्य न मुख्यानि साधनवत्त्वादि विप्रतिपत्तेरपि संशयहेतुत्वात् तद्वि
षये ऽतिव्याप्तिरिति लक्षणमिदमतिव्याप्तमतो लक्षणान्तरमाह सव्यभिचार इति व्यभिचारलक्षणमग्रे वक्ष्यति अनैकान्तिकं विभज
ते स च त्रिविध इति साधारणं लक्षयति पक्षसपक्षेति अत्र सपक्षविपक्षवृत्तित्वाभावे साध्यतदभाववत्त्ववृत्त्यलाभः पक्षवृत्ति
त्वे न पक्षनिष्ठसाध्यसंदेहजनकज्ञानविषयत्वं लभ्यते तथा च पक्षनिष्ठसाध्यसंदेहजनकज्ञानविषयत्वे सति साध्यतदभाव
सहचरितत्वं लक्षणमिति पर्वतो वह्निमान् पर्वतान्यत्वादित्यादावतिव्याप्तिवारणाय सत्यन्तं असाधारणे ऽतिव्याप्ति
वारणाय विशेष्यं संदेहजनके कोटिस्मरणविधया एकैकस्मिन्नतिव्याप्तेः साध्यतदभावेति द्वयोरुपादानमिति केचि
द्व्याचक्षते वस्तुतस्तु प्राचीनमते यथाश्रुतमेव सम्यक् पक्षपदं विपक्षपदयोर्वैकल्पिकोपादानाल्लक्षणद्वयं तात्पर्यं
पक्षे विपक्षे वृत्तित्वं सपक्षविपक्षवृत्तित्वं वा साधारणत्वमित्यर्थः अत एव विरुद्धयोरतिव्याप्तिवारणाय लक्षणद्वये विशे
षणद्वयं नवीनमते तु साध्यानधिकरणवृत्तित्वमेव साधारणानैकान्तिकत्वं न च विरुद्धे ऽतिव्याप्तिः तेषामुभ
यरूपवत्तायाः सर्वसम्मतत्वादतिरिक्ताभावः तस्येति सर्वस्येति शेषः कश्चित्पक्षेवेति पाठः पक्षसपक्षविप
क्षरूपस्य [illegible] स्य तस्य सर्वस्य प्रमेयत्वादित्यर्थः असाधारणं लक्षयति सपक्षेति सपक्षविपक्षव्यावृत्तिपाठे समा
हारद्वन्द्वः अत्र लक्षणद्वये तात्पर्यं सपक्षविपक्षव्यावृत्तत्वं पक्षसातिरिक्तसाध्यतदभावाधिकरणावृत्तित्वं असा

१

नीर ग्रं६

286 नास्तीति भावः ताद्दशव्याप्तिग्रहस्य मत्राप्रेद्वेत्वात् सिद्धेति वोध्यं अन्यथा तादृशव्याप्तेः सिद्धासिद्धिभ्यां व्याघातात् इति पक्षा
धर्मत्वासिद्धं लक्षयति इदमित्यादिना नवेत्यादि फक्किका अनुमानगम्यव्याप्यभावस्य व्यापकत्वेन ता व्याप्तिर्नास्तीति उपा
धिसंवंधेऽस्तीति अनौपाधिकसंवंधरूपव्याप्तेरसंभवादिति भावः व्युत्पत्तिवैरूप्येणोदाहरणांतरमप्यस्य दर्शयति अपरोपीति
ऋत्वंतरेति यज्ञीयपशुहिंसेत्यर्थः अधर्मसाधनमित्यत्राधर्मजनिति कुविकल्पाव आपुद्धतामिति वद धर्मसाधनमित्यर्थः एवम
नेपि प्रयोजकं साधकमित्यर्थः उपाधिरित्यत्र प्रयोजकमिति लिंगविपरिणामेनान्वयः सर्वं वस्तिन्मेनात्रोपाधीति सर्वेत्ति स्मार्त्य
ते निषिद्धत्वे विउपाधिलक्षणमस्तीति दर्शयितुमुक्तं पक्षेतरकं दर्शयति नन्विति साधनाव्यापकत्वव्याख्यानाति दृष्टमनुमान
प्रकरणे नवेति वालकसंकेयं तेन निषिद्धत्वकस्य मुपाधिलक्षणं नास्तीति न पर्यनुयोगः यद्वायमभिप्रायः अधर्मत्वाव
च्छिन्नकर्माकरणनिषिद्धकर्मकरणाद्भवति तथा च स्मृतिः विहितस्याननुष्ठानान्निंदितस्य च सेवनात् अनिग्रहाच्चेंद्रि
याणां नरः पतनमृच्छति पतनं पापं तथा च नित्यकर्माकरणेऽधर्मसाधनत्वं तिष्ठति न निषिद्धत्वमिति साधनाव्यापकत्वा
न निषिद्धत्वमुपाधिरिति भावः निषिद्धत्वस्य शुद्धसाधनाव्यापकत्वेपि साधनावच्छिन्नसाध्यव्यापकत्वं विद्यत एव
यथा श्यामकपाकजत्वेत्यामित्रापेत्तममाधत्ते मैवमिति साध्यसेत्यादि साधनावच्छिन्नसाध्यव्यापकत्वं यत्रयत्रेति यत्र यत्राधर्म
जनकहिंसात्वमित्यर्थः साधनाव्यापकत्वं दर्शयति नचेति क्रत्वंगहिंसायामभिचारस्फुटीकरोति अत्रेति यज्ञीयपशुहिं
सा श्येनहिंसात्वे वर्तते अधर्मजनकत्वे नास्ति अग्निषोमीयपशुमालभेतेत्यादिश्रुतेः तस्मात् यज्ञे वधोऽवधश्चेत्युक्तेश्च अ
वधो वधकार्यो कार्यो अधर्मजनक इत्यर्थः ननु तदा मा हिंस्यात् सर्वाभूतानीति निषेधश्रुतिः का गतिरिति चेत्तत्राह अन्यत्रेति
तथा च मा हिंस्यादिति सामान्यश्रुतेः विशेषश्रुतिदर्शनात् यज्ञीयेतरहिंसापरत्वं कल्प्यत इति भावः विरुद्धं लक्षयति साध्येतिसा

२

गो भावः ननु केवलविपक्षव्यावृत्तत्वेन व्याप्तिस्तु किं सपक्षवृत्तित्वेनेत्यत आह गमकेति गमकस्य साधकस्य हेतोरंगत्वात्सा
स्प ध्यसाधनीयधर्मत्वादित्यर्थः गमकत्वादिति पाठे साध्यानुमितिकारणीभूतत्वात्तेन विपक्षत्वमित्यर्थः अयमाशयः केव
287 लविपक्षावृत्तित्वमात्रान्नानुमितिः अन्यथा काञ्चनादौ हेतौ विसपक्षवृत्तित्वगमकाभावादनुमित्युत्पत्तेः नवा केवलसपक्षवृ
त्तित्वगमकत्वात् प्रमेयत्वादेरपि व्यभिचार... गमकद्वयाभ्यामनुमित्यनुत्पादात् तस्माद्विशिष्टस्यानन्यैवानुमितिकारण
त्वमिति विशिष्टस्यैव व्याप्तित्वमिति एतादृशव्याप्त्यभावः प्रकृते व्यभिचारपदार्थः एवं विशिष्टाभावस्वरूपोऽसाधारणस्य
ति व्याप्त एव व्यविपक्ष... व्यावृत्तिमत्त्वे विसपक्षवृत्तिरूपविशेषणाभावकृतस्य सपक्षवृत्तित्वविशिष्टपक्षव्यावृत्ते
त्त्वाभावस्यानुपपादितदर्शयति तस्येति प्रकृतेस्यासाधारणस्येत्यर्थः तस्य तन्नियमाभावः एवमित्यादिस्यभावदर्शयो
मिचारस्तिष्ठत्येवेति आभाहरणयोजनीयं साध्यविपरीतव्याप्तस्यैव साध्याभाववद्व्याप्यस्य विरुद्धस्यैवेत्यर्थः यथा विरुद्ध
ति स्य सपक्षवृत्तित्वविपक्षव्यावृत्तेर्नयाभावकृतविशिष्टनियमाभावो व्यभिचारः न तद्वत्रापि सपक्षवृत्तित्वरूपविशेषणा
भावकृतविशिष्टनियमाभाव इतिभावः विशिष्टनियमाभाववत्त्वांशे साध्येऽविशिष्टाभावः कुत्र विशेष्यव्यावृत्तिविशेषाभावात्के
वलविशिष्टाभावश्चैतिदर्शयति सपक्षेति तत्राद्यं दर्शयति सपक्षेति सपक्षविपक्षयोर्वृत्तेर्विपक्षव्यावृत्तत्वरूपविशे
ष्याभावात् द्वितीयमसाधारणस्य द्वितीयं दर्शयति सपक्षेति तत्त्वामिति सपक्षे विपक्षव्यावृत्ते सपक्षवृत्तित्वरूपविशेषणा
भावाद्विशिष्टाभाव इतिभावः यथा प्रकृत्यासाधारणस्य हेतुमुपलक्ष्य... विष्टुभेयाभावादविरोधः यथा विरुद्धस्य
केवलान्वयि केवलव्यतिरेकहेत्वोर्न व्यभिचारिता तत्र सपक्षविपक्षाप्रसिद्धावृत्तित्वविशिष्टविपक्षव्यावृत्तत्वाभा
वरूपव्यभिचारस्याप्रसिद्धेः एतदभिप्रायैव संभवतिसपक्षइति प्रागुक्तं प्रकरणसमं लक्षयति यस्येति प्रतिपक्षः मूते १४५
साध्याभावसाधकीभूतलिङ्गपरामर्शविषयइत्यर्थः तथाच समबलसाध्याभावसाधकहेत्वन्तरपरामर्शसमानकालीन

गंधवत्वस्येति ४

288 कृत्स्नादेरप्यसाधारणत्वमेव तन्मते तेषामलक्ष्येतु द्वितीयं पक्षमात्रेति एकलक्षणपरत्वे पक्षमात्रेत्यनेनैव सामंजस्ये सपक्षे साध्यवैय
र्थ्यापत्तेः अत्र मात्रपदेन सपक्षादिव्यावृत्तिलाभः इदं पक्षाविपक्षव्यतिरेकिणि सद्धेतावतिव्यापकं यथा पृथिवीतरभेदवती गंधवत्वा
त् इति तथाप्यत्र सति सपक्षे तद्व्यावृत्तित्वं विवक्षितमिति भावः पक्षवृत्तित्वे सति साध्यव्यापकाभावप्रतियोगित्वमसाधारणत्वमि
ति शिरोमणिचरणाः पूर्वलक्षणस्यासाधकत्वेन द्वितीयलक्षणसमसत्वस्यापत्तिः अत्र प्राचीनमतानुसारादेवानैकांतिकस्य त्रिविधत्वं
ग्रंथकारेण दर्शितं चिंतामणिकारादिमते तु द्विविधोनैकांतिकः तत्रानुपसंहारी तृतीयः तल्लक्षणं तु केवलान्वयिधर्माव
च्छिन्नपक्षताकत्वं यथा सर्वं वह्निमत् धूमात् इत्यादि प्रमेयत्वेन पक्षतया पक्षातिरिक्ताप्रसिद्धेः तत्र साध्यहेत्वोरुपसंहारा
संभवात् अवृत्तिहेतुकत्वमनुपसंहारित्वं यथाकाशादिकमित्यपि कश्चित् अयं प्राचीनमते साधारणमध्ये संभूतः अ
नेन रूपेण तानस्याप्यनुमितिप्रतिबंधकत्वात् पृथक् अन्यथासिद्धमध्ये सर्वहेत्वाभासानामंतर्भावापत्तेः असिद्धेः सर्व
व्यापकत्वात् इति नवीनाशयः ननु सव्यभिचार इति अनैकांतिकसामान्यस्य लक्षणे तत्र साध्याभाववद्वृत्तित्वं व्यभिचारः
स च पक्षमात्रवृत्तावसाधारणे न संभवतीति कथं तस्यानैकांतिकत्वमित्यत आह सव्यभिचारस्त्विति उभयसाधारण इति
शेषः संभवतीति इदं च केवलव्यतिरेकिणि सद्धेतौ सपक्षासंभवात्तद्व्यक्तिवृत्तित्वाभावेपि न व्यभिचार इति सोपनायविप
क्षे चेति चकारात्संभवतीति लभ्यते न च केवलान्वयिसद्धेतौ विपक्षाप्रसिद्ध्या न व्यावृत्तेरप्रसिद्धत्वेपि न व्याप्तिभंग इति
वाच्यं तेनापि विपक्षाव्यावृत्तिरेव सेवकारेण सपक्षवृत्तित्वविशिष्टस्य हेतौ विपक्षवृत्तित्वाभावरूपव्याप्तेर्न तु केवल
विपक्षवृत्तित्वाभावस्येति सूचयते नियमो व्याप्तिरिति सर्वः अत्रानौपाधिकत्वं वस्तुतो व्याप्तेर्विपक्षवृत्तित्वाभावक
थनेनानौपाधिकत्वं शालाभः सोपाधित्वे साध्यव्यापकाभाववद्वृत्तित्वेन साध्याभाववद्वृत्तिरूपविपक्षवृत्तित्व
स्यावश्यकत्वात् तद्व्यावृत्तत्वे तु भवत्येवानौपाधिकत्वं सपक्षवृत्तित्वकथनेन साध्यसाधनसामानाधिकरण्यलाभ इति

गौ०प०दे प्रामाण्यग्राहकानुमानात् अनुपलब्धतदप्रामाण्येः स्यादिति स्यात्त्वानुमानस्येत्यर्थः प्रामाण्यविलम्बिन्याऽस्य यासिद्धि
289 रितिभावः उपजीव्यत्वमिति तस्मादिति दुर्बलत्वं बलवत्त्वादित्यर्थः उपजीव्यं प्रामाण्यं साधकानुमानं बाधकं प्रबल
विरोधिहेतोः साध्याभावप्रमाजनकत्वेनेत्यर्थः एवं कारणत्वप्रतिपक्षत्वमित्यतः उपजीव्यकमपि स्वत्वानु
मानं दुर्बलत्वोपपत्तिवचनेपि प्राप्तत्वादित्यर्थः बाधकप्रमितिपक्षे तत्स्याभावप्रतिपक्षसाधकमित्यर्थः तत्रोपजीव्यमिति
उपजीव्योपजीवकभिन्नमित्यर्थः ननु पर्वतो वह्निमान् धूमादित्यस्याभावके सत्प्रतिपक्षत्वात् प्रत्यक्षप्रामाण्यमपत्त्वे
व्यतिरेकादिग्रहं स्वत्वानुमापकमप्युपजीव्योपजीवकभिन्नतया सत्प्रतिपक्षता स्यादित्याशङ्कायां तत्राह समबलेति तत्र
यत्र पक्षैकदेशो दोषो वास्तीति वक्तात्समबलत्वाभाव वस्तुतस्तत्पक्षस्येति न सत्प्रतिपक्षतेति भावः इदं त्ववधेयं सत्प्र
तिपक्षस्य दृष्टाविशेषादेव दोषत्वं प्रामाण्यमपत्त्वे दोषानुपपत्तिरिति दृष्टान्ते धूमस्यापि सत्प्रतिपक्षितत्वादेव बो
धकहेतोरेवासाधारण्ये सत्प्रतिपक्षयोर्दृष्टाविशेषेऽभासत्वमिति कालात्ययापदिष्टं लक्षयति यस्येति सत्प्रतिपक्ष
स्य लक्षयन्तत्र साध्याभावसाधकस्यानुमानरूपतानापेक्षिता किन्तु साध्याभावसाधकं यत्किंचित्प्रमाणसत्त्वमेव
बाध इति दर्शयति प्रत्यक्षादीत्यनेन किञ्चित् बलवत्प्रतिपक्षसाधकप्रमाणेनेति पाठस्तत्र बलवत्त्वं प्रामाण्यग्रा
हकानाकस्कन्दितत्वे बोध्यं पर्वतो वह्न्यभाववानिति बाधसत्त्वेपि हृदत्वात् सत्प्रमेत्यप्रामाण्यज्ञानसत्त्वेऽनुमितिरुद
याद्बलवत्त्वं प्रमाणविशेषणं परिच्छिन्नः प्रमाविषयीकृत इत्यर्थः प्रमितिविषयीभूतपक्षवृत्त्यभावप्रतियोगिसाध्य
कत्वं साध्याभाववत्पक्षकत्वं वा बाधितः इति लक्षणं बोध्यं असाधारणवारणाय प्रमित इत्यादि यदि च दुर्बलैक
स्यापि तस्य बाधितत्वमपि तदा द्वितीयं दूषणमित्यवधेयं तस्य प्रसिद्धासत्तामाह सत्त्वेति उदाहरति यथेति

290 त्वे प्रकरणसमत्वमित्यर्थः अस्यैव प्रसिद्धसंज्ञांतरं दर्शयति सत्त्वेति अनित्यधर्मेति सोपमित्यादि अस्यभिन्नानाविषयत्व
रूपानित्यधर्मवत्त्वेनानुपलभ्यमानत्वादित्यर्थः आत्मादिवदिति दृष्टांतो वोध्यः अयं वक्ष्यापन्नो हेतुः अत्र सत्प्रति
पक्षत्वं दर्शयितुमाह अत्रेति विपरीतेति साध्याभावसाधकमित्यर्थः नित्यधर्मेति उत्पन्नो विनष्ट इत्यादि प्रस्त
याविषयत्वरूपनित्यधर्मवत्त्वेनानुपलभ्यमानत्वादित्यर्थः घटादिवदिति दृष्टांतो वोध्यः लक्षणस्य समन्वयत्वे
पदप्रयोजनं दर्शयितुमाह यत्त्विति हेतुदोषवत्तयानुपस्थितत्वमतुल्यबलत्वं तत्रोपजीव्योपजीवकभाव
स्थलेऽतुल्यबलत्वमुदाहर्तुमाह तथाहीत्यादिना उपजीव्यमपेक्षणीयं उपजीवकं तत्सापेक्षं अनुमेयं तेऽनुमेयभिन्ने
नोपजीव्येनोपजीवकमित्यर्थः तत्रोपजीव्योपजीवकयोर्न तुल्यबलतेति दर्शयति तत्रेत्यादिना वाधकत्वे हेतु
र्बलवत्त्वादिति उपजीव्यानुमानं दर्शयितुमुपमनुपजीवकं दर्शयति यथेत्यादिना अत्र स्पर्शवत्त्वादित्यत्र सत्त्वा
दितिपाठे परमाणुत्वरूपेण मनसो विपक्षत्वमध्येतं नो वदतीति वोध्यं तेन न तत्र व्यभिचारः अन्यथा भौतिकपरमाणूना
मेव पक्षतास्यात् अस्योपजीव्यानुमानं साधकं न सत्प्रतिपक्ष इत्याह अस्येत्यादिना वाधकत्वे हेतुरुपजीव्यत्वा
दिति तत्रापि हेतुः तत्र धर्मीति धर्मिग्राहकानुमानं दर्शयति पृथिवीत्वमिति घटत्वादौ व्यभिचारवारणाय घटपटे
त्युभयोपादानं घटपटसंयोगे व्यभिचारवारणाय जातिपदं अस्योपजीव्यतां दर्शयितुं शंकामुत्थापयति कथमिति
आश्रयत्वाभावादिति परमाणोरनित्यत्वसाधकापेक्षणीयमित्यर्थः तदेवोपपादयति नहीति तथा चानित्यत्वानुमा
नस्य परमाणुसाधकानुमानापेक्षणं आश्रयासिद्धेः अपेक्षणं च तेनैव तस्यानित्यताया अपि सिद्धेर्वोध्यमिति अनि
त्यत्वसाधकस्य दौर्बल्यमेवेति भावः केनेति अनित्यत्वानुमानेनेत्यर्थः अनुत्पन्नं प्रमापितमित्यर्थः सवादेन
नित्यत्वानुमापकस्य हेतोराश्रयस्य परमाणोर्लाभाद् उक्तानुमानेन तेनानित्यस्योपजीवकत्वं स्वाश्रयपतनापा २९

गो०१४७ लक्षणत्वानावात्तोयाधिक.त्वे दर्शयति गोत्वेदनिसाध्वनी यदलि त्रेष्वः अप्रयोजकं समनियतामित्यर्थः नन्वेवोपाधिरिति
291 प्राकृप्रतियादिते तथा च यं गोः यन्मुत्वादिस्यत्रसास्नादिमत्वमुपाधिरिति भावः आवलेय त्वस्येतिशवलमात्रवृत्यंश्चा
वृत्तेवः तत्त्वं बावलेयादेयक्तीभूतेना व्यवृत्तित्वाज्ञागासिद्धमित्यर्थः एकेति एकशफत्वमेकखुरत्वं तच्चाश्वादिवृत्ति
गोर्द्विशफत्वमेवेति भवति पक्षेन विश्रवृत्तित्वमेकशफत्वस्येति एवं द्विशफत्वमपि कोक्षं दत्वव्वेयं तत्त्वाणहेतोय न्या
सदृशापामतिव्याप्त्यादिव्यवहारः हेतुदेशो पन्या सकालेतु व्यभिचारा त्विरहान्न प्रयोग इति स्थले पक्षधर्मत्वपति
अभिप्रायांतरेणेति वन्हे तात्पर्याविषयत्रासार्थमात्रहेत्व लंस्थलमित्यर्थः यत्र तात्पर्यविषयीभूतमतथा भूतंव
विकल्प्यदूष्यते तत्राति व्याप्तिवारणाय मात्रपदं यत्राग्नो नरो पन्नुवकं वक्तोपविष्टत्वादिति भमुत्ते कश्चिदूष
यति न वपदं वेन्नूननपरंतदापर कोऽयन्न तनवकं वक्तोपविष्टेत्यादि व्यभिचारः संख्यापरत्वे तदापकस्य वक्तमात्रो
पविष्टत्वादनवकं वक्तोपविष्टत्वमतिव्यमित्याद्युक्तेतात्पर्यविषयपक्षपदार्थदूष्यरोधविद्यत्वेत्व मितिको छं वेत्या म०
बृत्तेवित्व वेदमुक्तमिति सूचयते उक्तो वानुक्तोमि स्युच्यते तत्रेनवलं किंतु तस्यानन्नुभाव्याणस्याननागरुस्यानमवधेतभावः ल्छ
लं त्रिविधवाकृ छलं सामान्यछलं उपचारछलं चेति तत्रैक शक्यार्थ तात्पर्यकस्य शब्दस्य कल्पितार्थांतरदूष
णं वाकृछलं तदाह द्विविधकल्पितार्थांतरस्य शक्यत्वत्वस्य भेदात् तत्रैक शक्यार्थतात्पर्यकस्य शब्दकल्पित शा
क्यार्थांतरदूषणो दाहरणं दर्शयति यथेति यत्रनवशब्दस्यनूतनरूपशक्यार्थे तात्पर्यकस्य कल्पितेशा
क्यार्थांतरे नवत्वसंख्याविशिष्टेदूषणाभिधानात् शक्यांतरकल्पनं तु शक्यांतरेतात्पर्यविषयत्वकल्पनं एवम १४७
तेपि दृष्टं चेनानार्थकशब्दस्य लिप्त्य सं भवति. द्विनमपाति कं वक्तगतमितिदोषः तेनास्यकं वक्तद्वयम

292 अत्र कृत कृत्याशिति कश्चित्तु लक्षणे पदार्थे विद्यादावति हेतुः सिद्धपोवत्तुल्यत्वमेव लक्षणं प्रयोजयति तस्य चेत्तिकेत्यत्र
त्यकृत्वे त्यापेदापामाह वेति द्वितीये त्वित्ति स्मृत्यत्ति वृद्धयेत्यादाहरणान्तरमाह आपरोपीति तस्याभाव इति द्वंद्वे र
मनुरूपे सालिकत्वप्रसिद्धिरस्तीति मते अथ यथा सालिकत्वस्य प्रसिद्धा तथैवाभावस्य तत्संभवात् तत्पभितापावकथं
सालिकत्वाभावमाह इत्यत आह सम्बन्धमिति ननु स एवेत्यत्र तत्कालसंबंधरूपायाः तत्तायाः सन्निकर्षो भो
वाच्ये इत्यादिना कथं गृह्यत इत्यपेक्षायामाह सर्वानुभवेति तथा च लदेशे उपनीतभानं रूप तत्तेति भावः संस्कारस्य हेतु
तेत्यत्र संस्कारपदं तज्जन्यस्मृतिपरं सविषयकमात्रस्यैव प्रत्यासत्तित्वेन नाभिप्रायकं वा प्रकृतोपयोगाभावमाह
पूर्वापरेति पूर्वापरौ कालौ यस्य स्थिरवस्तु पदार्थस्य सत्तया तस्य कलनं विषयीकरणं यस्याः सा पूर्वापरकालकलना
तयेत्यर्थः पूर्वकालवृत्तिभिन्नोत्तरकालवृत्तिपदार्थविषयिणीति यावत् व्यापित्वेति अनेककालवृत्तित्वेत्यर्थः
तथा च घटोऽनेकक्षणमात्रवृत्तिरित्युत्तरकालिकोऽभावस्तस्य बाधः इति भावः तेनानेकक्षणावस्थायित्वस्य क्षणिकत्वा
भावरूपत्वाभावे विद्धति नासंगतिः उपसंहरन्नेव हेत्वाभासानां प्रयोजनमपि दर्शयति एतदिति व्याप्तिस्मानमादे
त्वसाध्यमिति एतेनासाधकतासाधनं दोषा हेत्वाभासानां तत्त्वनिर्णयो विजयो वा प्रयोजनमिति दर्शितं असाधक
तासाधनेनैव वह्निधूमासाधकस्त्वभिचारित्वाद्धितिरीत्या बोधः लक्षणात्मकं केवलव्यतिरेकि हेतुदोषाणामेव
तर्भावो नाधिक्यमिति दर्शयति य एतेति व्याप्यत्वासिद्ध इति साधारणमनैकान्तिकोपि बोध्यः व्याप्यत्वाभावे दर्शयति
विपक्षादिति इदं च संभवतिसपक्ष इत्यादिना असाधारणमनैकान्तिकव्याप्यत्वाभावे प्रदर्शनं सोपाधिकसंबंध रू
पकाप्यभावं दर्शयति सोपाधीति गोलक्षण एवेति गोलक्षणत्वेनाभिमतस्येत्यर्थः एवमन्येऽपि प्रयुक्तादेर्दोषास्तव गो

गौ॰ विकल्पसमा साध्यसमा प्राप्तिसमा ऽप्राप्तिसमा प्रसंगसमा प्रतिदृष्टांतसमा ऽनुत्पत्तिसमा संशयसमा प्रकं
१४८ रणसमा हेतुसमा ऽर्थापत्तिसमा ऽविशेषसमा उपपत्तिसमा उपलब्धिसमा ऽनुपलब्धिसमा ऽनित्यसमा नि
293 त्यसमा कार्यसमा इति चतुर्विंशति जातयः ॥ तत्र क्रमः ॥ आसां संक्षेपेणोदाहरणमात्रं प्रदर्श्यते साधर्म्येण स्थापना
यां तद्दूषकमुत्तरं साधर्म्यसमा यथा आत्मा सक्रियः क्रियाहेतुगुणवत्त्वात् लोष्टवत् क्रियाहेतुगुणश्चात्मा
ष्टिक्रियाजनकवायुसंयोगादिरेव इति स्थापनायामुत्तरं यदि सक्रियसाधर्म्यात् सक्रियस्तदा विभुत्वरू
पनिःक्रियसाधर्म्यान्निःक्रिय एव किं न स्यात् नियामकं किंचिदित्यनियामकमस्तीति साधर्म्यसमा जातिः ॥ एवं
वैधर्म्येणापि दूषकमुत्तरं वैधर्म्यसमा यथात्रैव क्रियावतो लोष्टस्य साधर्म्यात् क्रियावानात्मा तदा विभु
त्वरूपतद्वैधर्म्यान्निष्क्रिय एव किं न स्यात् न हि लोष्टसाधर्म्यात् क्रियावता भवितव्यं तद्वैधर्म्यान्निष्क्रियेण
भवितव्यमित्यत्र किंचिन्नियामकमस्तीति तदिदं वैधर्म्यसमा जातिः ॥ उत्कर्षसमा जातिं लक्षयति ग्रंथकारस्तु
त्रैसूत्र्यादिना अत्र भाष्ये तेनास्याद्युपविधानं अस्य दुष्टत्वात् व्याप्तिरूपं अर्थं ध्वनितेनेत्यप्रकारस्य पाठे वा युक्तः साध्यमात्र वे
६ नेत्यर्थः एवमग्रेऽपि साध्येति साध्यते ऽनुमीयते साध्यं यस्मिन्निति व्युत्पत्त्या साध्यपदेऽर्थः तथा च वायुरूपदृष्टां
तसाधर्म्यात्पक्षे वायौ अनभिमतधर्मांतरसाधनमुत्कर्षसमा जातिरित्यर्थः ॥ तेनैवेति कृतकत्वेन हेतुना साधर्म्येणेत्यर्थः
तथा घटे वा घटवत् घटे वेत्यर्थः सावयवः स्यादिति घटसाधर्म्यात् घटवदनित्यत्वसिद्धौ तु सावयवत्वेनासिद्धौ नियत्र
नियामकाभावादिति भावः ॥ अपकर्षसमं लक्षयति दृष्टांतगतेनेति अनुभावकस्येति पूर्ववद् दृष्टांतरत्वार्थे १४८
वायुरूपदृष्टांतसाधर्म्येण पक्षे वायौ अभिमतधर्मांतरस्याभावसाधनमपकर्षसमा जातिरिति ॥ पक्षे वस्तुने तेनैवेति

294 पिनसंभाव्यतइत्यर्थः तादृशस्यैवरा हस्यकाल्पितत्वात्तात्पर्यं हि बलरूपं द्वितीयं वाक्छलं उदाहरणं तु पीतेत्युक्तइत्यत्रपी
तपदस्य शाब्दार्थरूपतात्पर्यसत्वेप्यर्थरूपवक्तृतात्पर्यरूपप्रतिपाद्यस्य घटस्य द्वेधत्वमेव न तु तत्वमिति॰
कसंसर्गतात्पर्यकस्य वाक्यस्य संसर्गान्तरकल्पनयाहिबलं सामान्यच्छलं यथा ब्राह्मणोविद्यासम्भवामिश्रापकस्य वा
क्यस्यनियमपरतां प्रकल्प्य ब्रूयात् नयुक्तमेतत् मूर्खोनामविप्रोलक्षणानांदर्शनेनइतिलाक्षणिकार्थतात्पर्यक
स्यशब्दस्यार्थान्तरकल्पनयाहिबलमुपचारच्छलं तदपि द्विविधं कल्पितार्थान्तरस्यशाक्यत्वलक्षणभेदात् यथा
गंगायांघोषइत्यत्र लक्ष्यार्थतीरतात्पर्यकेमुक्तार्थं हि बलं कथं जले घोषइतिप्रथमं द्वितीयं तु तत्रैव ला
क्षणिकार्थान्तरमत्स्यादिपरतयाहिबलं कथं वा गंगासंबंधिनि मत्स्यादौ घोषकासः संभवतीति छल
स्यप्रयोजनमाह सर्वेति छलोद्भावनाद्वादिविजयः प्रयोजनमितिभावः जातिपदार्थलक्षयति असद
दुत्तरमिति असत्वं तु जात्युत्तरस्य व्याप्तसाधकतासाध्याप्येन परासाधकतया स्वव्याघातकं
त्वात् तथा च स्वव्याघातकमुत्तरं जातिरिति लक्षणं पर्यवस्यति हेत्वाभासानां परकीयहेतावेवासाध
कतासाधकत्वेन स्वदुष्टत्वं यत्वसत्वादिति पञ्चदशवात्र प्रकरणसमजातिरूपतयालक्षणत्वमेव तद्वान्तर
भेदाः कतीत्याकांक्षायामाह साधर्म्येति पञ्चविंशतिः साधर्म्यसमादिक्रमेणैव गणनं नोत्कर्षसमादि
क्रमेणेतितत्रैवववक्तुं युज्यते तथाप्यत्रोत्कर्षसमजातेर्लक्षणपतनाभिज्ञत्वात् तत्क्रमेणैववक्तव्ये साधर्म्यसाध
र्म्यसमयोरुत्कर्षत्वात् तासां लक्षणं विना उत्कर्षसमजातेर्लक्षणकरणे सदर्भविरोधापत्तेः वक्ष्यमाणेति चतुर्वि
शतिप्रकारेति भावः तासु प्रथमा साधर्म्यसमा वैधर्म्यसमा उत्कर्षसमा अपकर्षसमा वर्ण्यसमा अवर्ण्यसमा।

गौ०१४९ तिः अप्राप्त्या प्रत्यवस्थानमप्राप्तिसमा जातिः यथा तत्रैव पर्वतोऽग्निदेशाद् अप्राप्तस्य हेतोः साध्यसाधकत्वं बाधं तथा च
२९५ अप्राप्तत्वाविशेषात् सर्वं सर्वं साधयेदिति अयमेव हेतुः साध्याभावं किमिति न साधयेत् अयमेव साधयेदित्यत्र नियामका
भावादित्यप्राप्तिसमा जातिः साधनपरंपराप्रसंगः प्रसंगसमा जातिः यथा क्रियावत्त्वे क्रियाहेतुगुणवत्त्वं साधनं तत्र किं सा
धनं न हि साधनं विना कस्यचित्सिद्धिरस्ति एवं तत्रापि किं साधनमित्यादिनि प्रसंगसमा जातिः दृष्टान्तान्तरेण साध्याभाव
साधने प्रतिदृष्टान्तसमा जातिः यथा तत्रैव लोष्टदृष्टान्तेन क्रियावत्त्वे साधिते क्रियाहेतुगुणयुक्तमाकाशं निष्क्रियं दृष्टमि
ति तद्दृष्टान्तेनात्मनोऽनिष्क्रियत्वमेव किं न स्यात् लोष्टदृष्टान्तेन सक्रियत्वमाकाशदृष्टान्तेन निष्क्रियत्वमित्यत्र नि
यामकाभावादिति प्रतिदृष्टान्तसमा जातिः अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमा जातिः यथा शब्दोऽनित्यः प्रयत्ना
नुविधायित्वात् घटवदित्युक्ते कश्चिदाह प्रयत्नानुविधायित्वं यद्यनित्यत्वे प्रमाणं तदा शब्दस्योत्पत्तेः पूर्वं तदभा
वान्नित्यत्वं नित्यस्य तदानुत्पन्नत्वाच्चेति अनुत्पत्तिसमा जातिः उभयसाधारणधर्मप्रदर्शनेन संशयापादनं संशयस
मा जातिः यथा शब्दोऽनुमानेन शब्दस्यानित्येन घटेन सह प्रयत्नानुविधायित्वेन रूपसाधर्म्यं यथास्ति तथा नित्येन शब्दत्वे
न जात्या सामान्येनावणप्रत्यक्षविषयत्वं साधर्म्यमस्तीति उभयसाधर्म्यदर्शनात् उभयतानरूपः संशयः एकतरविशेष
नियामकाभावादिति संशयसमा जातिः व्याप्युक्तहेतोः साध्यविपरीतस्य साधकं हेत्वन्तरोद्भावनं प्रकरणसमा जातिः अत्र
ति स्फोटोदाहरणमेवाग्रे एतल्लक्षणबोध्यं इति प्रकरणसमा जातिः कालत्रयेऽपि हेतुत्वासंभवेनाहेतुत्वकथनमहेतुसमा जातिः
प्रयत्नानुविधायित्वं शब्दस्य पूर्वकालवृत्ति चेत् तदा शब्दानित्यत्वरूपसाध्यस्य तदानीमभावात् कस्य साधकं अथ यदि १४८
दि पश्चात्कालवृत्ति तदा पूर्वकाले साधनाभावात् कस्य साध्यस्य ज्ञानि स्यात् यदि च उभयमेककालवृत्ति तदा किं कस्य साध्य

साधनं किं कस्य

296 कृतकत्वेनेत्यर्थः आवर्ण्यमानं स्यादिति अवर्ण्यः इन्द्रियजन्यप्रत्यक्षविषयो न स्यादिति अर्थः वर्ण्यः ख्यापनीयस्य दृष्टान्तधर्मस्य
पक्षे साधनं वर्ण्यसमा यथा सक्रियत्वानुमाने लोष्टगतं नोदनाद्यभिसंयोगादिरूपः क्रियाहेतुगुणोस्तीति भवतु तस्य क्रियाव
त्त्वं आत्मनस्तु न तत्क्रियावत्त्वे न तत्र नोदनाद्यभिसंयोगवत्त्वमपि स्यात् तच्च न स्यात् न तत्त्वमिति न तु क्रियावत्त्वं नेत्यं तत्तत्क्रि
यात्वे न तु नोदनादिमत्त्वमित्यत्र नियामकाभावादिति वर्ण्यसमा जातिः साध्यहेत्वोर्दृष्टान्ते अविकल्पे तुल्यतया साधनेन अवर्ण्य
समा जातिः यथा तत्रैवानुमाने लोष्टादिगतो नोदनादिरूपक्रियाहेतुगुणवत्त्वमात्मनि सिद्धं नास्ति तथा च तुल्यतया
असिद्धेन क्रियाहेतुगुणेन क्रियावत्त्वं साध्यते तथासिद्धेन क्रियावत्त्वेन क्रियाहेतुगुणवत्त्वं किमिति न साध्यते नियामका
भावादित्यवर्ण्यसमा जातिः दृष्टान्ते विकल्पं प्रदर्श्य दार्ष्टान्तिके विकल्पकथनं विकल्पसमा जातिः यथा तत्रैवानुमाने
क्रियाहेतुगुणयुक्तं किंचिद्गुरु भवति यथा लोष्टादिकं किंचिल्लघु भवति यथा वायुः एवं क्रियाहेतुगुणयुक्तं किंचि
त्क्रियावत्स्यात् यथा लोष्टादि किंचिदक्रियं यथा आत्मेति पूर्वोक्तो विकल्पो भवति अयं तु न भवतीत्यत्र नियामकं वाच्य
मिति विकल्पसमा जातिः दृष्टान्तस्य पक्षतुल्यताकथनं साध्यसमा जातिः सा च भाष्ये अत्र प्रदर्शिता यथा तत्रैव यदि यथा लो
ष्टस्तथा आत्मेति त्वयोच्यते तदा यथा आत्मा तथा लोष्ट इत्यागतं तथा च यथात्मनि क्रियावत्त्वं साध्यते लोष्टेपि तर्हि त
त्साधनीयं नो चेत्तर्हि यथा लोष्टस्तथात्मेति न वाच्यं लोष्टसदृश आत्मा आत्मसदृशो न लोष्ट इत्यत्र नियामकाभावा
दिति साध्यसमा जातिः प्राप्त्या प्रत्यवस्थानं प्राप्तिसमा जातिः प्राप्तिश्च हेतोः साध्यसामानाधिकरण्यं यथा तत्रैव क्रियाहे
तुगुणवत्त्वं पक्षे साध्यसामानाधिकरण्येनैव तत्साधकं वाच्यं तथा च उभयोरपि सिद्धत्वाविशेषात् क्रियाहेतुगुणवत्त्वे
नेव किमिति क्रियावत्त्वसाधनं क्रियावत्त्वेन क्रियाहेतुगुणवत्त्वं किं न साध्यते विनिगमकाभावादिति प्राप्तिसमा जा

क्रियावत्त्वस्य अतो

गौ०१५०
तत्रैव शब्दस्यानित्यत्वानुमाने यदि अनित्येन घटेन साधर्म्याच्छब्दोऽनित्यस्तदा अनित्येन केनचिद्धर्मेण सर्वस्यैव तत्सदृशत्वात्स
297 र्वस्यानित्यत्वमित्यनित्यसमा जातिः। धर्मस्यानित्यत्वानित्यत्वविकल्पाद्धर्मिणो नित्यत्वसाधनं नित्यसमा जातिः। यथा शब्दस्य
यदनित्यत्वमङ्गीक्रियते तन्नित्यमनित्यं वा यदि नित्यं तदा शब्दवृत्तेरेव तस्य सदातनत्वाच्छब्दस्यापि तथात्वमागतं अथ तद
नित्यं तदा तस्य कदाचिदनित्यत्वाभावो लोके इति नित्य एव शब्दः इत्युभयथापि शब्दस्य नित्यत्वमिति नित्यसमा जातिः। प्रय
त्नहेतोरनेककार्यत्वोपदर्शनेनाभिधाने कार्यसमा जातिः। यथा तत्रैव प्रयत्नानुविधायित्वमुभयथा संभवति प्रयत्नेन घटा
दिवच्छब्दस्य स्वरूपोत्पत्तेर्जलादिवदावारकनिवृत्तेर्वा। यथापि प्रयत्नानुविधानदर्शनात्। तथा च तस्यावारकनिवृत्ति
रूपप्रयत्नकार्यस्य संभवान्नानित्यत्वनियतत्वमिति कार्यसमा जातिः। आसामसदुत्तररूपजातीनामसदुत्तरलोकादि
प्रकाराः। ग्रन्थगौरवभयान्न प्रदर्शिताः। परिशिष्टं यथामतत्त्वबोधाय दवमिपुक्तैरनुसंधेयमिति। निग्रहस्थानं पदार्थं लक्षयति
पराजयहेतुरिति। यस्तत्त्ववादिविजये तत्त्वपराजयस्य वक्तारं जनकीभवति निग्रहविषयत्वं वा निग्रहस्थानत्वं इदं च यद्यपि
च्छलादावव्याप्तं तथापि तेषामयथार्थनिग्रहस्थानमध्येऽन्तर्भावाददोषः। छलत्वादिनापि तासामुपयोगि-
त्वात् पृथगुपादानं हेत्वाभासवत्। तत्रावान्तरभेदजिज्ञासायां बालव्युत्पत्त्युपयोगितया यत्किंचिदवान्तरभेदाभूद्दर्श
यति। तेच्छेन्यूनेति। बहुविधमिति द्वाविंशतिप्रकारमित्यर्थः। तथा च सूत्रं प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञा-
संन्यासः हेत्वन्तरं अर्थान्तरं निरर्थकं अविज्ञातार्थं अपार्थकं अप्राप्तकालं न्यूनं अधिकं पुनरुक्तं अननुभाषणं अज्ञानं
अप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगः अपसिद्धान्तः हेत्वाभासाश्च निग्रहस्थानानीति। तत्र
स्वप्रतिज्ञातार्थपरित्यागः प्रतिज्ञाहानिः। यथा शब्दोऽनित्यः ऐन्द्रियकत्वात् घटवदित्युक्ते प्रतिवादिना प्रत्यक्षेणैन्द्रियकं सामा

तेः ता स्तु री वेतिसू

न्

298 मितिनियामकाभावात् हेतुरहेतुसमजातिः ॥ अहेतुसमाजातिः अर्थापत्तिपुरस्कारेण साध्याभावोद्भावनमर्था
पत्तिसमाजातिः यथा पूर्वोक्तानुमाने शब्दस्यानित्यसाधर्म्यादनित्यत्वं यदि तदार्थापत्त्या सिद्धं नित्यसाधर्म्यान्नित्य
त्वमपि अस्ति शब्दस्य नित्यसाधर्म्यमस्पर्शवत्त्वमिति एकतरावधारणे नियामकाभावादिति अर्थापत्तिसमाजातिः
सर्वाविशेषप्रसंगोद्भावनमविशेषसमाजातिः यथा तत्रैव यदि प्रयत्नानुविधायित्वेनानित्यघटसाधर्म्येण शब्दस्या
नित्यत्वं तदा प्रमेयत्वादिरूपेण तत्साधर्म्येण सर्वस्यैवानित्यत्वं स्यादिति सर्वाविशेषप्रसंगः त्वदुक्तसाधर्म्येणानित्य
न त्वमायाति मदुक्तेनेत्यत्र नियामकाभावादित्यविशेषसमाजातिः ॥ उभयपक्षसाधर्म्येण साधनोपपत्तिकथनमनुपपत्तिसमा
जातिः यथा तत्रैव यदि वानित्यत्वसाधनं प्रयत्नानंतरीयकत्वमुपपद्यते इति शब्दस्यानित्यत्वेन तदा नित्यत्वसाधनमस्पर्शव
त्वमुपपद्यते इति नित्यत्वं किं न स्यादित्युपपत्तिसमाजातिः ॥ वस्तूपदर्शितसाधनाभावे विसाध्यस्योपलब्धिकथनमुपल
ब्धिसमाजातिः यथा तत्रैव प्रयत्नं विनापि वायुनोदनवशाद्वृक्षशाखाभंगजन्यस्य शब्दस्योपलब्धेः प्रयत्ना
नुविधायित्वरूपहेतोर्नास्तीत्युपलब्धिसमाजातिः ॥ वादिनानुपलब्धिवशात्कस्यचित्पदार्थस्याभावे स्वीकृतेऽनुपलब्धिवशा
देवकोद्यमितस्यापि किंचित्पदार्थस्याभावसाधनमनुपलब्धिसमाजातिः यथा उच्चारणात्पूर्वं शब्दस्याविद्यमा
नस्याप्यावरणवशान्नोपलब्धिः यथा जलादेर्विद्यमानस्याप्यावरणवशादनुपलब्धिस्तद्वत् एतन्मते वादिना शब्द
स्य यद्यावरणवशाच्छब्दो नोपलभ्यते तदा जलाद्यावरणादिकमिव शब्दाद्यावरणमप्युपलभ्येत इति अत्रोत्तरं
यदि नवद्भिस्तदनुपलब्धित आवरणवशाच्छब्दो नोपलभ्यते तदानुपलब्धेरप्यनुपलब्धेस्तदभावे सिद्धे तदभावाद
वरकसिद्धिरित्यनुपलब्धिसमाजातिः ॥ अनित्यदृष्टान्तसाधर्म्यात्सर्वानित्यत्वप्रयोगोद्भावनमनित्यसमाजातिः यथा

नवेद्भिरनुपलब्धेर्वराद्युद्रस्यावरकं नोपलभ्यते तदनुपर आवरकाभावो निलीयते ॥

गौ०सू० अनित्यमित्यादिवादिना वाक्यत्रयमुक्तमविज्ञातं प्रतिवादिना सदस्यैश्च यत्तत् एतेन तदविज्ञातार्थं तत्र लिङ्गान्तमयमन्वयसिद्ध्यर्थके
२११ वरितो च्चरितत्वात् श्लिष्टादिकमित्यादिरूपं नन्विज्ञातार्थपदसमूहोऽपार्थकं यथा शब्दः कृतकत्वाद् घटः पटो वा नित्यमनित्यं च
प्रमेयत्वादित्यादि अवयवक्रमानामनुक्रमेण कथनमप्राप्तकालं यथा कृतकत्वाच्छब्दोऽनित्य इत्यादि स्वसिद्धान्तसिद्धावयवं
अवयवानामन्यतमेनापि विकलं न्यूनं तेनान्विताभ्युपगमपुनरुक्तमिन्नस्य सिद्धप्रयोजनस्य पुनः कथनमधि
कं हेतूदाहरणाधिकमिति वा यथा नित्यः शब्दः श्रावणत्वात् शब्दत्वादित्येवमुदाहरणद्वयमपि कोथवा अनुवा
दं विना शब्दार्थयोः पुनः कथनं पुनरुक्तं यथा नित्यः शब्दो नित्यः शब्द इति शब्दपुनरुक्तं नित्यः शब्दो ध्वंसाप्रति
योगी वा इत्यर्थपुनरुक्तं वादिना त्रिरुक्तस्य सदस्यैर्विज्ञातार्थस्य वाक्यस्याननुवादोऽननुभाषणं इदं पञ्चविधं न यतिय
नदित्यादि सर्वेनाम्नाऽनुवादः विपरीतानुवादः अनुवादं विना दूषणवचनं तत्तो भोवे तिसदस्यैर्ज्ञातस्य वादिना त्रिरुक्त
स्य वाक्यार्थस्यावबोधोऽज्ञानं अनूदितवादिवाक्ये विज्ञातेऽपि तदर्थस्य उत्तरस्फूर्तिवशात् सभीभावोऽप्रतिभा विलंबा सर
का कार्यान्तरव्यासंगमुत्पाद्य कथाविच्छेदो विक्षेपः यथाऽद्य मे वकार्यमस्ति ततश्च त्वादृशि सह कथयिष्यामीति स्व
पक्षे तद्दोषामनुज्ञामात्रपरपक्षे दोषप्रसंजनं मतानुज्ञा यथा त्वं चोरः पुरुषत्वादिति चोरः इत्यादिकं वादिनो निग्रहस्था
नसत्वे विप्रतिपत्तिवादिनस्तदनुद्भावनं पर्यनुयोज्योपेक्षणं इदं चैकस्य पराजयश्रितिरिक्तेः सदस्यैर्वाच्यं न तु वादिना ह्य स्व
स्य दोषस्वस्य ख्यापना नो चित्येन निग्रहस्थानानिग्रहेनिग्रहस्थानाभावेऽनिरनुयोज्यानुयोगः छलजातिरेतन्न ख्यापित भावि
एकसिद्धान्तमाश्रित्य कथाप्रवृत्ते तद्विरुद्धसिद्धान्तमवलंब्योत्तरदानमपसिद्धान्तः यथा ईश्वरस्य जगदेकप्रकृतिविकार
........त्वात् एकमस्ति इति प्रकृतिकस्य वचनं तदसिद्धान्तमवलंब्य प्रत्युक्ते का प्रकृतिः को वा वि
कार इति प्रतिवादिना पृष्टे यस्मिन्नवस्थिते धर्मिण्येकधर्मनिवृत्तौ धर्मान्तरमुत्पद्यते सा प्रकृतिः यो धर्मो निवर्तते १५१

300 त्वं नित्यं दृष्टमिति तद्वदेव शब्दो नित्य एव किं न स्यादिति तत्रैवमुत्तरं यदि दोषे पक्षत्वात्तत्राभ्युपगम्यते नित्यत्वं तदा घटो ऽपि नित्यो ऽस्तु
नि एतेन स्वार्थसाधकस्य दृष्टान्तस्यानित्यत्वमङ्गीकुर्वन्नपि दस्यानित्यत्वं प्रतिज्ञातां जहातीति इदं पक्षबाधा भवति पक्षत्यागः साध्यत्यागः
हेतुत्यागः दृष्टान्तत्यागः तद्विशेषणत्यागश्च यथा शब्दो ऽनित्यः अस्पर्शगुणत्वादित्यत्र सो ऽयं गकार इति प्रत्यभिज्ञाबलात्स्वरेण
वादे उद्भाविते अस्तु तर्हि घटो नित्य इति पक्षपरित्यागः सर्वोक्तिदोषात्कित्वविकारित्वात्साध्यविरोधात् अनित्यः
शब्दो द्रव्यत्वादित्युक्ते परेण स्वरूपासिद्धो ऽयमिति दूषिते कृतकत्वादिति पुनर्हेतुप्रयोगे हेतुत्यागः दृष्टान्तत्यागो ऽप्येवमुदाहार्यः
द्रव्यात्मकः शब्दो नित्यः इत्यत्र आत्मवदित्यसिद्धो ऽयं भावने अस्तु तर्हि शब्दो नित्य इति पदविशेषणत्यागः एवं साध्यविशेषणत्यागो
हिर विरोधः सर्वोक्तिप्रतिज्ञायां दूषितायां तद्विशेषणान्तरदानं प्रतिज्ञान्तरं तच्च द्विविधं पक्षविशेषणदानात्साध्यवि
शेषणदानाच्च आद्यं यथा शब्दो ऽनित्य इत्यत्र ध्वनाविनाशिनः सिद्धसाधने उद्भाविते वर्णात्मक इति पक्षविशेषणदाने ऽन्त्यं य
था अनित्यत्वात्सर्वगुणजन्यत्वात्कार्यत्वादित्यत्रारंभजन्यत्वेन सिद्धसाधने उद्भावने सविषयकेति गुणविशेषणदाने प्रतिज्ञाहे
त्वोर्विरोधः प्रतिज्ञाविरोधः यथा द्रव्यं गुणभिन्नं रूपादितः पृथक्त्वेनानुपलभ्यमानत्वादिति स्वयं प्रतिज्ञातार्थापलापनं प्र
तिज्ञासंन्यासः यथा नित्यः शब्द ऐन्द्रियकत्वादिति परेण सामान्ये व्यभिचारस्योद्भावने दूषिते स्वोक्तमपनयति केनोच्यते ऽ
नित्यः शब्द इति अत्रापनयश्चतुर्विधो भवति क एवमाह को ऽपि परमतानुवादो ऽयं मया कृतः इति द्वितीयः स्वयमुक्तो ऽपि त्वयैवे
दमुक्तमिति तृतीयः परोक्तमेव मयेदमुक्तमिति वा तुर्यः सव हेतौ दूषिते तद्विशेषणान्तरोपादानं हेत्वन्तरं यथा शब्दो ऽनित्यः प्र
त्यक्षत्वादित्यत्र सामान्ये व्यभिचारस्योद्भाविते जातिमत्वे सतीति विशेषणदानं प्रकृतानुपयुक्तार्थकथनमर्थान्तरं यथा अनि
त्यः शब्दः अस्पर्शवत्त्वादिति हेतुः हेतुपदं हि नोतेस्तु निष्पन्नं यत्कृदन्तपदं तत्सुप्तिङन्तमित्यादि वाचकं वर्णक्रमनिर्देशवन्नि
रर्थकं यथा नित्यः शब्दः कचटतपानां जबगडदशत्वात् झभघढधषवदिति अपार्थकमपदार्थं पूर्वापरासंबद्धं यथा दश

गणी

र्थिनामत्र प्रवृत्तिरित्यपवादमाह इहेति अत्यंतानुपपन्नामिति बालकस्याल्पवयस्त्वेन पेदितामासि

301 त्यर्थः तेषां विजेतानल्पयौरवादिहितत्वात विद्यार्थिनस्तु गुरुणामत्यंतकोमलत्वा

द्रकध्ययने वाधिकारात्तेवालेप्यत्यस्य स्पर्धमिदंबाल्यमत्यस्य

नत्वादिति भावः एतदेवदर्शयति एत्यवतेवेत्यादिना

हे धीर तर्कभाषायां नैकत्त्वावधीरणाऽ

स्यार्थ्यः सर्वत एवास्मास्त्वं बहिर्यतयते ॥१॥

मा बद्धोपि तर्कभाषावालकैर्दृष्टं

संह ति चानि रे लीयिलोपवेष

भागाधः किं महोदधिः ॥२॥

अस्मेष्वामपि संविली

स्वविद्वतीः स

माविना

ष्वा

॥अंकारा

करं मात्सर्यंमनसो विहायकलयेत्वात्वां मदीयामपि भावार्थं प्रतिसंदधाति हृदये कोवीरधीरोयदि स्या १५२

देवोनंतरणविनिर्मितोविधौ श्लाघ्यो ममायमसः ॥३॥ विपाकवपमतांवाल्लानां शिष्यालामिह काम्यया मौरी

त्रेऽस्य घटे एव सविकारत्वमु... मतमपसिद्धान्तः तन्मते असत उत्पत्तिर्नास्ति सतो विनाशो नास्ति किं त्वाविर्भावतिरो
भावमात्रं कार्यकारणयोरभेदः कारणरूपेण सूक्ष्मतयावस्थानं तिरोभावः कार्यरूपेण स्थूलतयावस्थानमावि
र्भाव इति सत्कार्यवादिमतं प्रकृतिविकारयोर्भेदाभावादनुमानमिदं न सिध्यति असतः कार्यत्वादेरसिद्धत्वात् इति
हेत्वाभासलक्षणं तु प्रागुक्तं एतानि च सर्वाण्येव सन्ति सेन वेजल्पवितंडयोरुद्भावनीयानि कथाविच्छेदकत्वाद्धे
दकथायां तु मेषां चातुर्विध्यं केषांचिदसंभवः केषांचिदनुद्भावनीयत्वं केषांचिदुद्भावनीयत्वं केषांचित्कथाविच्छे
दकत्वान्न तत्र प्रतिज्ञाहानिः प्रतिज्ञासंन्यासः निरर्थकमविज्ञातार्थमपार्थकं मर्षणीयं वेति षट्कं वादे न संभवति यद्यपि
प्रतिज्ञाप्रतिज्ञा[illegible] किं संभाव्यते तथापि स्वज्ञप्तिगोपनार्थी नामेषां न संभावनेति सांप्रदायिकाः तथा प्रतिज्ञा
न्तरं हेत्वन्तरमर्थान्तरमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणमिति सप्तकं वादे संभवदपि नोद्भावनीयं विज
यमात्रैकफलत्वात् तथा प्रतिज्ञाविरोधोऽप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमपसिद्धान्तः एतत्सप्त
कं वादे उद्भावनीयं तत्त्वनिर्णयोपयोगित्वात् परं तु न कथाविच्छेदहेतुः हेत्वाभासो निरनुयोज्यानुयोग इति द्वयं वा
दकथाविच्छेदहेतुरिति संक्षेपः स्वोक्तानां लक्षणानि दर्शयति तत्रेत्यादिना अस्मदुपदर्शितरीत्या लक्षणानामर्थो ज्ञेयः
सिद्धान्ताद्विति अपध्वंसः स्वसिद्धान्तत्यागः अस्य सिद्धान्तकथने स्वप्रतिकूलस्येति स्वदेशस्येत्यर्थः प्रतिज्ञाविरोधं लक्ष
यति [illegible] स्वार्थस्येति स्वयमुक्तप्रतिज्ञाहेतुरूपस्येत्यर्थः मिथो विरोधः विरोध इति प्रतिज्ञाविरोध इत्यर्थः ननु
सर्वेषां निग्रहस्थानानां पराजयनिरूपणार्थं प्रतिज्ञातत्वात् तत्र केषांचित्प्रमाणादीनामत्राविवेचितत्वाल्लक्षणं कृतं केषांचित्त्वलक्षणं जातिनि
ग्रहस्थानानामेवान्तरभेदनाहुल्येपि [illegible] विशेषस्यैव निरूपणं कृतमिति [illegible] यस्य न्यूनतया कथं [illegible]

303

कांतेन धीरेण कृता भावार्थदीपिका ॥४॥ इति श्रीमन्महोपाध्यायश्रीगौरीकांतसार्वभौमभट्टाचार्य
विरचिता तर्कभाषाभावार्थदीपिका समाप्ता शुभमस्तु सर्वजगतां सरस्वत्याः प्रसादतः श्रीमा
शारदायै नमः ॐ श्रीमद्गुरुचरणकमलेभ्यो नमः ॐ ॐ श्रीमद्गुरुभ्यो नमः ॐ
ॐ

श्रीमन्महाराज श्रीमद्राधाकृष्णाभ्यां नमः ॐ ॐ श्रीमद्राधाकृष्णाभ्यां नमः ॐ
ॐ राधे श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे कृष्ण श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे श्री ॐ
ॐ श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण राधे श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री ॐ
ॐ श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे श्री कृष्ण श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे श्री
ॐ श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण राधे श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री
श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे श्री कृष्ण श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे
श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री राधे श्री राधे श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण
ॐ श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे श्री कृष्ण श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे श्री राधे
ॐ श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री राधे श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण श्री कृष्ण
ॐ श्रीमद्राधाकृष्णाभ्यां नमः ॐ ॐ श्रीमद्राधाकृष्णाभ्यां नमः ॐ ॐ श्रीमद्राधाकृष्णाभ्यां नमः ॐ ॐ श्री
मद्राधाकृष्णाभ्यां नमः ॐ ॐ श्रीमद्राधाकृष्णाभ्यां नमः ॐ ॐ श्रीमद्राधाकृष्णाभ्यां नमः ॐ ॐ ॐ

Sans MSS Vol 8

39

458